सितम्बर 2004

आरण्यकम्
अर्धवार्षिकं संस्कृतशोधपत्रम्

आर० एन० आई० सं० 58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्) — स्व० पण्डित कमलाकान्त उपाध्यायः — 15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः) — श्री देवकुमार मिश्रः 'अलमस्त' — 15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा — श्री नर्मदेश्वर ओझा — 15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' — पं० जगदीश्वर प्रसाद मिश्र 'नलिन' — 35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) — स्व० भवानीदत्त पाण्डेयः — 51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा — श्री नर्मदेश्वर ओझा — 51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् — पं० व्रजभूषण मिश्र 'आक्रान्तः' — 41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य' — श्री जगदीश्वर प्रसाद मिश्र 'नलिन' — 51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह — श्री जगदीश्वर प्रसाद मिश्र 'नलिन' — 51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) — स्व० पं० उपेन्द्रनारायणदत्त शर्मा — 41 रूप्यकाणि
11. भावनाविलासशतकम् — स्व० पण्डित उपेन्द्रनारायणदत्त शर्मा — 21 रूप्यकाणि
12. हनुमच्चरितम् — स्व० पण्डित व्रजभूषणमिश्र 'आक्रान्तः' — 51 रूप्यकाणि
13. उपनिषदों की भूमिका — पं० जगदीश्वर प्रसाद मिश्र 'नलिन' — 51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) — स्व० पण्डित वचन मिश्रः
15. चरितरत्नत्रयी — स्व० पं० व्रजभूषणमिश्र 'आक्रान्तः' — 51 रूप्यकाणि
16. जगन्नाथचरितम् — डॉ० बनमाली बिश्वालः — 60 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

## संस्कृतप्रसारपरिषद्
आरा (विहारः)

सितम्बर 2004

# आरण्यकम्

## संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्


वर्षम् – एकादशम्　　　　अङ्कः – द्वितीयः

आश्विनः, वि० सं० २०६१

सितम्बर, २००४



प्रतिवर्षं प्रकाशनकालः

चैत्रः, आश्विनः-विक्रमाब्दः

मार्च, सितम्बर

प्रत्यङ्कम् - १५ रूप्यकाणि　　　　वार्षिकं शुल्कं ३० रूप्यकाणि

## परामर्शदात्री समितिः

डॉ० सुरेशचन्द्र गो० काण्टावाला, बड़ोदरा

डॉ० हरिहर झा, दरभङ्गा

डॉ० उमाशङ्कर शर्मा 'ऋषिः', पटना

डॉ० भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी

डॉ० राय अश्विनी कुमारः, बोधगया

*संस्थापकः*

स्व० पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

*सम्पादकः*

डॉ० गोपबन्धु मिश्रः

*सह-सम्पादकः*

डॉ० सुनीलकुमार प्रधानः

*प्रकाशिका*

संस्कृतप्रसारपरिषद्

मारुतिमन्दिरम्

प्रकाशपुरी, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः डॉ० गोपबन्धु मिश्रेण, आरा प्रिन्टर्स, गोला मुहल्ला, आरा, बिहार-802301 इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च ।

डॉ० गोपबन्धु मिश्रः

सम्पादकः

# सम्पादकीयम्

**औत्सुक्यमात्रमवसादयति प्रतिष्ठा**
**क्लिश्नाति लब्धपरिपालनवृत्तिरेषा ।**

इति अभिज्ञानशाकुन्तले महाकविः कालिदासः । प्रतिष्ठाप्राप्तेः पूर्वं प्रतिष्ठायै जायमाना उत्सुकता तत्प्राप्तेः समनन्तरमेव अवसन्ना भवति, किन्तु प्राप्तायाः प्रतिष्ठायाः सम्यग् रक्षणं कष्टकरं भवति, अपरेषाम् अपेक्षायाः आधिक्यात् स्वस्य क्षमतायाः सीमितत्वाच्च इति श्लोकार्धस्यास्य आशयः । एषा स्थितिः दुष्यन्तस्येव उत्तमस्य विवेकिनः प्रजासेवैकध्येयस्य राज्ञः आसीत् । किन्तु अद्यत्वे न तथा । इदानीं प्रतिष्ठा प्रतिष्ठितस्य औत्सुक्यं नावसादयति, तस्य ततोऽपि अधिकप्रतिष्ठालोभपरवशत्वात् । पुनश्च, प्रतिष्ठायाः परिपालनं तस्य क्लेशाय न भवति, अपरेषाम् अपेक्षापूर्तिविषयेऽनवधानात् प्रतिष्ठायाः स्वार्थपूर्तिसाधनत्वेन पर्यवसितत्वाच्च । अतः सान्दर्भिकश्लोकसम्बद्धस्य 'प्रतिष्ठितस्य' समीक्षणं ताटस्थ्येन अकृत्वा प्रतिष्ठां प्राप्तुकामस्य प्रतिष्ठावतश्च बौद्धिकस्तरानुगुणमेव करणीयम् । तच्च न केवलं राजतन्त्रसम्बद्धानां जनानां चारित्रिकविश्लेषणसन्दर्भे, अपितु शिक्षणव्यवस्थासन्नद्धानां तथाकथितानाम् उत्तमोत्तमजनानाम् आचरण-समीक्षणप्रसङ्गे अनुध्यातुं शक्यते । राष्ट्रियशैक्षिकनीतिनिर्धारणावसरे तस्याः समितेः सदस्यताम् अध्यक्षतां वा प्राप्तुं प्रत्यक्षं परोक्षं च महान्तं यत्नं कृतवन्तः तथाकथिताः प्रतिष्ठिताः नीतिनिर्धारणकाले राष्ट्रियं हितम् उपेक्ष्य अतीव संकीर्णतया स्वार्थ-स्वजनहितसाधकं चिन्तनं तदनुगुणं कार्यं च कुर्वन्ति । तद्यथा राष्ट्रियशिक्षानीतौ राष्ट्रधर्मं राष्ट्रसंहतिं राष्ट्रहितं च पूर्णतः पोषयन्त्याः संस्कृतभाषायाः यादृशी गौरवमयी स्थितिः स्यात् सा स्थितिः एतादृशानां तथाकथित-प्रतिष्ठितानां नीतिनिर्धारकाणां स्वार्थसंकीर्णदृष्टेः कारणेन कदापि नागता । तथैव माननीयसर्वोच्चन्यायालयस्य स्पष्टनिर्णयादनन्तरमपि केन्द्रीयमाध्यमिकशिक्षापरिषद्द्वारा स्वपाठ्यक्रमे संस्कृतस्य योग्यस्थानाऽनिर्धारणम्, नवोदयशिक्षापद्धतौ संस्कृतस्य अयोगः, विविधासु प्रान्तीयमाध्यमिक-

शिक्षापरिषत्सु पाठ्यविषयरूपेण पूर्वं प्रचलितस्य संस्कृतस्य उच्छेदः इत्यादीनि कतिपयानि उदाहरणानि तमेव निष्कर्षं पोषयन्ति यत् प्रतिष्ठाप्रणयः एव ज्यायान् न तु जनहितं राष्ट्रहितं वा । एतेन कारणेन तेषां क्लेशः औत्सुक्यस्य अवसानं च मनागपि न लक्ष्येते ।

परन्तु परहितार्थं क्लेशमेव स्वीकुर्वन्तः प्रतिष्ठाप्राप्ति पराङ्मुखाः 'एकं लक्ष्यम् एकं जीवनम्' इति ध्येयवादकारणेन संस्कृतसेवामात्रं जीवनस्य लक्ष्यत्वेन आचरन्तः सन्ति केचन सन्तः । तथा संस्कृतमेव सर्वदा सुप्रतिष्ठितं द्रष्टुकामाः, आजीवनं प्रतिष्ठाप्रणयात् बहुदूरं स्थितवन्तः, शयने जागरणे वा, विविक्ते देशे जनारण्ये वा, स्वगृहे वसुधानिलये वा, सुहृत्सु उदासीनेषु वा, मरौ वा सुरम्ये उपवने वा, सर्वथा संस्कृतमेव ध्यायन्तः तदेव सेवमानाः संस्कृतजगति पितामहतुल्याः अस्माकम् 'आरण्यक'स्य अस्य परामर्शदातृषु विद्वत्सु वरिष्ठाः **श्रीमन्तः पण्डित वासुदेवद्विवेदिमहोदयाः** इहलोकं परित्यज्य गोलोकवासिनः संजाता इति तन्महाप्रयाणसंजातशून्यहृदयाः वयम् एतद् दुःखातिशयेन सूचयामः । 'सार्वभौमसंस्कृतसंस्थानम्' इति वाराणसेय्याः सुप्रसिद्धायाः संस्कृतप्रचार-परायणायाः संस्थायाः संस्थापकाः एते महाशयाः संस्कृतप्रचारसाधकानाम् अनेकेषां गीत-कविता-कथा-कोष-नाट्य-समीक्षादिग्रन्थानां रचनां कृत्वा न केवलं संस्कृतं सार्वभौमं विधातुं स्वजीवने एव सफलयत्नाः आसन् अपितु आधुनिककाले संस्कृतभाषाव्यवहारकौशलवर्धनशीलानां कृते प्रेरणास्रोतोविशेषरूपेण चिरम् अमरत्वम् अधिष्ठितवन्तः एव सन्ति । पुण्यश्लोकानां पण्डितद्विवेदिचरणानां स्मृतौ तेषां परमधाम्नि परमशान्तये परमेश्वराय श्रीमते विश्वनाथाय श्रद्धाञ्जलीः समर्पयामः ।

कैश्चिद् अपरिहार्यैः कारणैः 'आरण्यकम्' इदं किञ्चिद्विलम्बेन प्रकाश्यमानमस्ति । संस्कृतस्य प्रतिष्ठामेव आत्मनः प्रतिष्ठां मन्यमानम् इदम् आरण्यकं संस्कृतेन संस्कृतस्य यं कमपि समीक्षणीयं पक्षं समीक्ष्य आत्मनः धन्यतां साधयितुं प्रवर्तते ।

*विदुषां वशंवदः*

सितम्बर २००५ गोपबन्धु मिश्रः

सम्पादकः

# सूचीपत्रम्


| | विषयः | लेखकः | पृष्ठम् |
|---|---|---|---|
| 1. | भारतीयदर्शनस्य समाजिकत्वम् | प्रो० उमाशङ्करशर्मा 'ऋषिः'<br>(पूर्वः) संस्कृतविभागाध्यक्षः<br>पटना विश्वविद्यालयः, पटना<br>आवासः-विद्यापुरी, पटना-20 | १ |
| 2. | भारतीयसमाज :- एकमाकलनम् | डॉ० रमाकान्त मिश्रः<br>प्राध्यापकः<br>राष्ट्रीयसंस्कृतसंस्थानम्<br>राजीवगान्धीपरिसरः<br>शृङ्गेरी, कर्णाटकम् | ७ |
| 3. | एकं साख्यं च योगं च | डा० मधुबाला सिन्हा<br>व्याख्यात्री<br>धर्मसमाजसंस्कृतमहाविद्यालयः<br>मुजफफरपुरम्, विहारः | १९ |
| 4. | वृत्तयः काव्यमातरः | डा० (श्रीमती) आभा सिंहः<br>वरिष्ठव्याख्यात्री, संस्कृतविभागः<br>हरप्रसाददासजैनमहाविद्यालयः<br>आरा, विहारः | २७ |
| 5. | भारतमञ्जर्यां गीतोपदेशः | डा० (श्रीमती) वीणा शर्मा<br>व्याख्यात्री,<br>श्री राघवेन्द्रसंस्कृतमहाविद्यालयः<br>तरेतपाली, पटना | ३३ |

# भारतीयदर्शनस्य सामाजिकत्वम्

प्रो० उमाशङ्कर शर्मा 'ऋषिः'

दर्शनशास्त्रस्य सामान्यात्पथो भारतीयं दर्शनं न पृथक् प्रवर्तते, दर्शनं नाम दृश्यजगतः, चिन्तकस्य जीवस्य, तयोः संयोजकस्य परमेशादेश्च प्रतिपादकं शास्त्रम्। तदेवं ज्ञानविषयस्य ज्ञानकर्तुः सर्वनियामकस्येतेषां त्रयाणां विचारणं शास्त्रत्वेन भारतीयान्यपि दर्शनप्रस्थानानि शिक्षयन्ति। भवतु नाम तद्विस्तरविषयको विवादः प्रतिप्रस्थानम्, किन्तु विषयत्रयमविचार्य न कश्चन दार्शनिकः स्वं दर्शनमवतारयितुं समीहते। योऽहं चिन्तयामि, प्रयत्नं करोमि, चेतनरूपेणावस्थितोऽस्मि, सोऽपि कश्चन पृथगेव पदार्थ इत्यात्मदर्शनं प्रवर्तते। तदन्तर्गतमेव सर्वं तत्त्वान्तरमिति कुत्रचिदाध्यात्मिकी प्रवृत्तिर्वरीवर्ति। किञ्च दृश्यमानमिदं किं कुतः कुत्र कथमित्याद्या जिज्ञासाः अपि मानवमाकुलीकुर्वत्यः किमपि समाधानमपेक्षन्त इति तद्विषये विचाराणां प्रवाहेण जगद्दर्शनं प्रवर्तते। कोऽस्य जगतः प्रेरको नियामकश्चेति प्रश्ने समुत्थिते समाधानानुसन्धाने प्रवृत्तं दर्शनं तृतीयम्। एवं सामान्यदर्शनस्य त्रेधा विचारविषया विभिन्नान्पथोऽनुसरन्ति ।

एतेषु त्रिषु दर्शनविभागेषु सर्वत्र सर्वदा च जगद्-दर्शनं सर्वाधिकं महत्त्वमापद्यते। वस्तुतो दृश्यं जगदवलोक्यैव दर्शनशास्त्रस्योत्पत्तिरिति सर्वे पाश्चात्याः पौरस्त्याश्च विपश्चितो मन्यन्ते। क्वचित्संसारस्य रहस्यमुद्घाटयितुं क्वचिदस्य विषयव्यवस्थितिं व्याख्यातुं क्वचित्संसारे दुःखत्रयमनुभूयास्य प्रतीकारोपायं च विचारयितुं दार्शनिकानां प्रवृत्तिर्दृश्यते। भारतीयेषु दर्शनप्रस्थानेषु त्वनेकेषामारम्भे संसारस्य स्थितिरेव व्याख्यानकोटिमारोहति। तथा ह्यास्तिकदर्शनमध्ये न्यायवैशेषिकयोः प्रवृत्तिः संसारस्य प्रकल्पितानां पदार्थानां व्याख्यानम्। पदार्थानेव साधर्म्यवैधर्म्याभ्यां प्रकाराभ्यामवगम्य सम्यग्

दुःखत्रयाभिघातपीडितः पुरुषो दुःखात्यन्तविमोक्षरूपमपवर्गं सद्यो वा परम्परया वाप्नोति ।

सांख्यानामपि तथैवोपक्रमः। तथाहि रजःपरिणामरूपेण दुःखत्रयेणाभिहताः प्राणिनो लौकिकैर्वैदिकैश्चोपायशतैरप्यस्य दुःखजातस्य ऐकान्तिकीमात्यन्तिकीं च निवृत्तिमलभमानाः सांख्यशास्त्रोक्तादेव व्यक्ताव्यक्तज्ञविज्ञानात् कैवल्यरूपं मोक्षमवाप्तुं क्षमन्ते सर्वथापि दुःखविनाशो न केवलः स्वार्थिकः, प्रत्युत परिवेशस्थानां समेषामपि प्राणिनामिति स्वार्थातपरः समाजः खलु दार्शनिकानां लक्ष्यविषयः। भारतीयदर्शनस्य सारभूतोऽयं श्लोकः पारम्परिको बहुधा श्रूयते -

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत् ॥ इति॥**

इह सर्वेऽपि समाजसदस्याः पुरुषा दर्शनस्य विषयीभूताः।

अपि च संसारे समाजो विशिष्टं संस्थानमिति दर्शनशास्त्राणि सर्वाण्युरीकुर्वन्ति । किञ्च यत्र संसारस्य दर्शनं निरूप्यते तत्र न केवलं दृश्यमानं जडीभूतं जगदेव विषयीभवति, प्रत्युत नानात्मरूपः समाजोऽपि विचारकोटिं प्रविशति । सांख्यशास्त्रे पुरुषाणां बहुत्वं साधयितुकामेन तथ्यमेतत्स्फुटीक्रियते । तथा हि- यत्रैकः पुरुषो मोक्षं लभतेऽन्ये पुरुषा बन्धनस्था एव; एको दुःखी अपरश्च सुखी । यद्येक एव पुरुषः स्यात्, सम्पूर्णः समाज एवैकरूपो भवेत् । न च तथात्वं दृश्यते। अतएव प्रतिपुरुषं पृथग् व्यवस्थेति। विविधानामपि पुरुषाणां समन्वयः समाजः ।

भगवतो बुद्धस्यापि चरितानुकीर्तनं तथ्यमिदं प्रकटयति। संसारे सर्वानपि मनुष्यान् दुःखानलेन दह्यमानानवलोक्य किल करुणावरुणालयः सिद्धार्थः राजकुमारोऽपि सर्वविलासवैभवं तादृशं परित्यज्य प्राव्राजीत् । अन्ततश्च चतुर्णामार्यसत्यानां (सर्वं दुःखम्, दुःखहेतुः, दुःखनिरोधः, दुःखनिरोधमार्ग इत्येवंरूपाणां) साक्षात्कारपर्यन्तं स्वस्मिन् स्थितोऽपि निर्वाणलाभानन्तरं समाजमेव स्वकार्यक्षेत्रमकार्षीत्। यत्र संघस्थापनं तन्महत्त्वप्रतिपादनरूपं च ‘ध[illegible] शरणं गच्छामि, संघं शरणं गच्छामि’ इत्यादिवाक्यजातं ‘बहुजनहिताय



बहुजनसुखाय’ इत्यादिकञ्च स्फुटमेव समाजोन्मुखं प्रवर्तनं दर्शयति। बुद्धस्य सामाजिकानि कार्याण्यद्यापि भारते वर्षे एतदितरेषु च देशेषु परम्परया दृश्यन्ते। क्वचित् क्वचित् संघस्येतिहासे वैमनस्यं पाखण्डादिकं चागतं दूरीकर्तुमपि विविधानामाचार्याणां प्रयासो यथाकालं स्मर्यते। सर्वथापि सामाजिकत्वं न परित्यक्तम् ।

भारतीयदर्शनस्य वैलक्षण्यमिदं भूयोभूय उद्घोष्यते यदिदं न ज्ञानमात्रस्य दर्शनमपि तु सम्पूर्णजीवनस्य विवेचनम्। दार्शनिकानां सिद्धान्तानेव तेषामाचारपक्षः अनुवर्तते। महत्त्वस्य दृष्टया नानयोः काचन न्यूनाधिकता दृश्यते। वस्तुतस्तयोरपूर्वं सामञ्जस्यम्। केवलं सिद्धान्तपक्षमाश्रितवतो न किमपि सामाजिकं महत्त्वं भवति।

ये तु दार्शनिकम्मन्यास्तर्कशक्तिपरायणाः शुष्कं सिद्धान्तपक्षमाश्रयन्ते विस्मृतात्मानस्ते विक्षिप्तप्रायाः समाजानुपयोगिनो जनतासु महतीं निन्दामनुभवन्ति। पाश्चात्त्येष्वेवंप्रायाः श्रूयन्ते दन्तकथाविषयाश्च भवन्ति। न तथा भारतीये दर्शने स्थितिः। अत्र तु सर्वेऽपि दार्शनिकाः समाजावयवाः सन्त एव स्वसिद्धान्तान् प्रकाशयन्ति । तेन सर्वोऽपि भारतीयः सिद्धान्तः सरसः समाजानुप्राणितश्च जायते। येऽपि मायावादिनः शङ्कराचार्यप्रमुखाः संसारस्य पारमार्थिकं मिथ्यात्वं प्रस्तुवन्ति, तेऽपि संसारस्य व्यावहारिकीं सत्तां नोपेक्षन्ते। धर्मशास्त्रानुसारेण सर्वं कार्यं समाजस्योपयोगाय भवेदिति तेषामपि व्यावहारिकः पक्षः। प्राचीनकालात्परम्परया समागतेषु पीठादिषु विहारादिषु चाद्यावधि दैनिकः कार्यक्रमो नियमबद्धो वर्तते, शोभनमध्ययनाध्यापनम्, स्वशास्त्रानुसारी व्यवहारश्च साधुर्दृश्यते। तत्र महानेव जनसमूहः कार्यव्यापृतः।

साम्प्रतमपि प्राचीनां दर्शनपद्धतिमाश्रित्य प्रवर्तमाना रामकृष्णाश्रमादयः समाजस्य महान्तमुपकारं कुर्वन्ति। सम्पूर्णदिवसं परिश्रमेण क्लान्ताः श्रान्ताः कर्मठाः पुरुषास्तत्र सायं मानसं स्वास्थ्यं लभन्ते, दर्शनकथासु नितरां मोदन्ते।

योगदर्शनं विशेषतः सम्पूर्णस्य समाजस्य कल्याणाय मनःस्वास्थ्य-सम्पादनाय मस्तिष्कतन्तुतान (tension) निवारणाय च प्रतिपुरुषं चित्तवृत्ति-निरोधोपायान् निर्दिशति । तानेवानुसृत्य प्रत्येकं मनुष्यः स्वव्यवहारानित्थं

प्रवर्तयति यत्समाजस्याभ्युदयो भवेत् । यथा-अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा इति कथ्यन्ते प्रथमयोगाङ्गरूपाः। तेषां प्रत्येकं पालनं न केवलस्य पालयितुः साधकस्य, प्रत्युत महतः समाजस्य कल्याणाय कल्पते। तथा हि- अहिंसा नाम मानसो वाचिकः शारीरिकश्च हिंसाविरोधः। तत्र मानसेन हिंसाभावेन भवतु नाम हितं साधकस्य पुरुषस्य मनःप्रसादरूपम्, किन्तु वाचिकी शारीरिकी च हिंसानिवृत्तिः सम्पूर्णस्य समाजस्य कल्याणं करोति। तथैवास्तेयमपरिग्रहश्चेत्येतौ पालकादप्यधिकतरमन्येषां हितं कुरुतः। अपरिग्रहो नाम भोगसाधनानां संग्रहाभावः। यदि भोगसाधनानां समाहरणे कस्यचन प्रवृत्तिर्वरीवर्ति तदान्ये समाजसदस्यास्तैस्तैः सुखसाधनैः वञ्चिताः स्युः, निरर्थकं सन्तप्यमानाश्च द्वेषकारिणो भवेयुः। अतएव अपरिग्रहग्रहणे सामाजिकमेव हितमुद्दिश्यते। चित्तशान्तिस्तु स्वार्थभूतं प्रयोजनमित्यन्यत्।

अपि च योगशास्त्रे बौद्धदर्शने च चित्तपरिकर्मणामुपदेशः सामाजिकं हितमेव निरीक्षते प्रधानतः। चित्तप्रसादनं चैतेषां फलं स्वार्थिकम्। तथा हि- मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनमिति पातञ्जलं सूत्रम् । अस्यार्थः - सुखितेषु जनेषु मैत्रीभावनां कुर्यात्, न तु ईर्ष्याम् । दुःखितेषु करुणाभावनां धारयेत् 'कथमेषां दुःखं हरिष्यामीति'। पुण्यवत्सु मुदिताभावना हर्षभावः श्रेयस्करः 'एते पुण्यात्मान' इति हर्षस्य विषयः। अपुण्यवत्सु नु उपेक्षैव श्रेयसी भवति, नानुमोदनं न वा विद्वेषः। इत्थं भावनानां प्रवृत्तौ सम्पूर्णो मानवसमाजो विषयीक्रियते। समाजे हृष्टे सति स्वयमपि हर्षो भवति चेन्मनःप्रसादः समुदेति। मनःप्रसादाय समाजे शान्तिर्व्यवस्था चावश्यकी भवति ।

संसारमात्रस्य परिवारतायां कल्पितायामेव तत्सम्भवति । अतएवोक्तम्- उदारचरितानां तु वसुधैव कुटुम्बकमिति । तदुपोद्बलकम् ईशोपनिषद् वाक्यम्- तत्र को मोहः कः शोक एकत्वमनुपश्यतः (सं. ७) इति । अर्थात् सम्पूर्णस्य जगत एकत्वकल्पनायां न द्वैतमवतिष्ठते, न च विरोधावसरः अयं निजः परो वेत्यादिरूपः प्रसरति। गीतायां च श्रीकृष्णः समदर्शनत्वं तथैव विवृणोति -



**सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।**
**ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ (६.२९)**

एतादृशं दर्शनं समाजमाश्रित्यैव प्रवर्तते ।

भारतीयदर्शने सुखवादात्मकं किमपि दर्शनं स्वार्थप्रचारकं सत्कदापि नादरं प्राप्नोत्। आत्मनः अर्थात् स्वमनःशरीरयोः सुखमेव कामयमानस्य चार्वाकस्य दर्शनं सर्वदा विरोधिपक्षत्वेन सर्वत्र समुपस्थापितः। अपरत्र संस्कृतिकोशभूतानां पुराणानां सारभूतः सिद्धान्तः परोपकाररूपः श्लोकेऽस्मिन् प्रकाशितः -

**अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।**
**परोपकारः पुण्याय पापाय परपीडनम् ॥**

किञ्च प्राचीनतमे साहित्ये ऋग्वेदेऽपि दानस्तुतिप्रसङ्गे परार्थं स्वसमर्पणस्य माहात्म्यं वर्णितम्। 'केवलाघो भवति केवलादी' (ऋ० १०. ११७.६) अर्थादेकाकी भुञ्जानः पुरुषः पापीयान् भवति। सैषोक्तिः समाजवादमपि निर्दिशति।

सर्वेषामपि भारतीयानां दर्शनप्रस्थानानामुद्भवस्तथाभूत एव परोपकारप्रधाने परिसरेऽभूदिति नानवगतं सताम् । भोगस्य साधनानि बहून्यपि विहायात्रत्याः पुरुषा विशालस्य प्राणिवर्गस्य कल्याणाय कृतशरीरार्पणाः श्रूयन्ते। बोधिसत्त्वावदानेषु परश्शताः कथाः बोधिसत्त्वस्य प्राणार्पणपर्यवसानां प्रवृत्तिं प्रतिपादयन्ति। भारतीयानां राज्ञामपि मनस्सु दर्शनमेतत्तथाभूतामेव प्रवृत्तिं समचालयदिति प्रस्तुतेन प्रसिद्धेन श्लोकेन स्फुटीभवति -

**न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम् ।**
**कामये दुःखतप्तानां प्राणिनामार्तिनाशनम् ॥**

एवं समाजो मानवसमुदायरूपो भारतीयदर्शनस्यास्त्येव लक्ष्यविषयः।

❊

# संस्कृतप्रसारपरिषद्, आरा

## संक्षिप्तम् इतिवृत्तम्

❖ स्थापनातिथिः 22.2.1987
❖ निबन्धनसंख्या 424/1994-95
❖ कार्यालय :- संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (विहारः) 802301 दूरभाषसंख्या - (06182) 224193
❖ आरण्यकम् (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)
❖ पञ्जीकरणसंख्या - RNI 58951/94
❖ संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः)। अथ सम्मानिताः विद्वांसः-

| | | सम्माननवर्षम् |
|---|---|---|
| 1. | पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. | पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. | पण्डित सीताराम उपाध्यायः | 1989 |
| 4. | पण्डित सभानाथ पाठकः | 1990 |
| 5. | पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6. | पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7. | पण्डित केदारनाथ शुक्लः | 1993 |
| 8. | पण्डित जनार्दन मिश्रः | 1994 |
| 9. | पण्डित रामनरेश त्रिपाठी | 1995 |
| 10. | पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. | पण्डित रामप्रवेश त्रिपाठी | 1996 |
| 12. | पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. | पण्डित अम्बिकादत्त त्रिपाठी 'व्यासः' | 1998 |
| 14. | पण्डित डॉ० श्यामानन्द झा | 1999 |
| 15. | पण्डित व्रजभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. | पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |
| 17. | पण्डित जयानन्द मिश्रः | 2001 |
| 18. | पण्डित वृन्दावन त्रिपाठी | 2003 |

❖ प्रकाशितानि - 12 पुस्तकानि (विवरणं शोधपत्रस्य पृष्ठभागे)
❖ संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
❖ संस्कृतसम्भाषणशिविराणाम् आयोजनम्
❖ महाविद्यालय/उच्च-मध्य-प्राथमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
❖ वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरःसरं पुरस्कार-प्रमाणपत्रादिवितरणम् ।
❖ संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्रसर्वकारस्य अनुदानेन संस्कृतशिक्षक-प्रशिक्षणवर्ग - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम् ।

❖



# भारतीयसमाज एकमाकलनम्

डॉ. रमाकान्तमिश्रः

विश्वे समेषामपि देशानां स्व-स्व-संस्कृतिः स्वीयः कश्चन समाजश्च वर्तेते। यद्यपि समाजः अत्यन्तं व्यापकतां बोधयति तथापि आरम्भे व्याप्यत्वेन विचारयामः। अन्यदेशवत् भारतस्यापि कश्चित् अद्वितीयः समाजः विद्यते। प्राचीनेतिहासस्यावलोकनेन ज्ञायते यत् भारतमेव विश्वे जगद्गुरुस्थानारूढमासीत्। आध्यात्मिकता, सच्चारित्र्यम्, नैतिकता आदि एतद्देशस्य वैशिष्ट्यम् ।

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥**

अतः एतादृशस्य सभ्य-सुसंस्कृतस्य समाजस्य स्वरूपमाकलयामः।

समाजशास्त्राधारः शिक्षायां परमावश्यकोऽस्ति। तत्र प्रथमतया अस्मद्देशस्य सामाजिकं रूपं सांस्कृतिकं च रूपं कीदृशमस्तीति विचारः कर्त्तव्यो भवति। वर्तमानकालीनसमाजस्य स्वरूपमेव मुख्यतया विचारणीयोंऽशश्चेदपि तेनैव सह भारतीयसमाजेतिहासस्योपरि च दृष्टिपातः करणीय एवेति विचारयामः।

समकालेन अनेकभूपालोपभुक्तभारतीयसमाजे एकमेव वैदिक-समाजस्य रूपं वयं पश्यामः।

**उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।**
**वर्षं तद् भारतं नाम भारती यत्र सन्ततिः ॥ इति ॥**

आसेतुहिमाचलम् एकप्रकारकः समाजः संचालितः तस्य केन्द्रबिन्दुः वेदः शास्त्राणि च। स च समाजः सनातनधर्मसमाज इति कथ्यते। समाजस्य

सञ्चालनं कथं कर्त्तव्यमित्यत्र मनोर्मतमित्थं दृश्यते।

**आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥**

इति ऋषिभिः दर्शिते मार्गे, तर्कसम्मते मार्गे वेदशास्त्राणां विरोधं जीवनस्य निर्वाहः कर्त्तव्यः। एतदेव समाजस्य जीवातुः इति मन्यमानैः भारतीयैः विभिन्नराजैः शासितेषु नानाप्रान्तेषु समानजीवनचर्चा प्रादर्शि। यद्यपि ईषदन्तरं भौगोलिकदृष्ट्या क्वचिदनुभूतं स्यात् तथाऽपि षोडशसंस्काराः, पूजापद्धतिः, व्रतकथाः, आचारः, मतधर्माः, संस्कृतभाषा, सरससाहित्यं, आध्यात्मिकता इत्याद्यनेके विचाराः श्रुतिमूलत्वं प्रदर्शयन्ति। प्राचीनभारतीयसमाजेषु परिवारः प्रधानसंस्था भवति, तस्य व्यवस्थापकः परिवारज्येष्ठः, प्रायः अविभक्तकुटुम्बपद्धतिः प्रचुरतया आसीत्। सर्वेषाम् ईश्वरस्योपरि विश्वासः, कृषौ आसक्तिः, पशुपालने श्रद्धा, स्त्रीषु मातृत्वभावना, आज्ञाकारिता, संयमः, वर्णव्यवस्था, सर्ववर्णिनां पारस्परिकसौहार्द, वाणिज्यं (देशे विदेशेषु च), आश्रमधर्मस्य पालनं चेति विशिष्टाः अंशास्तत्र लक्ष्यीक्रियन्ते। अत्र वर्णाश्रमधर्मप्राधान्यं प्राचीनभारतीयसमाजस्य मेरुदण्ड इव दरीदृश्यते, यतो हि परम्परया शैशवादेव जात्याधारितवृत्त्यनुसरणाय कृतश्रमो भवति मानवः, तथैव जीवनध्येयं भगवत्साक्षात्कारः इति मत्वा आश्रमान् सेवते स्म। तेषामयं विश्वासः आसीत् यत् स्वधर्मोचितकर्मानुष्ठानेन जीवनं सार्थकं कर्तुं शक्यते।

**श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।**
**स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥**

तदेवमुच्यते "आश्रमादाश्रमं गत्वा, मनो मोक्षे निवेशयेत्" इति आश्रमधर्मः सामान्यजनस्यैव नासीत् राजानोऽपि विद्यार्जनाय गुरुकुल-मध्यतिष्ठन्, तथैव स्वशासनभारम् उत्तरदायिनि विन्यस्य अरण्यवासिनो बभूवुः। कविकुलगुरुः कालिदासो वक्ति :-

**शैशवेऽभ्यस्तविद्यानां, यौवने विषयैषिणाम् ।**
**वार्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥**



इत्थं भारतीयसमाजः शान्तिप्रियः, आत्मविश्वासी, परिश्रमी, कुलधर्मश्रद्धालुः आसीत्। तत् परिणामतः एव भारते तादृशमुत्कृष्टं साहित्यं, विज्ञानं, शिल्पकलाः, सङ्गीतम् इत्यादि लोकोत्तरकृतयः अद्यापि समस्तं विश्वम् आकर्षति। एतादृशसामाजिकसांस्कृतिकगुणोत्कृष्टतामनुसन्धाय, जर्मनवासी म्याक्स्मुलरः जगाद- "दुर्लभं भारतीजन्म मानुष्यं तत्र दुर्लभम्" इति। यद्यपि भारतीयसमाजः सनातनधर्मविश्वासी आसीदेव तथाऽपि सर्वेषां वैचारिकस्वातन्त्र्यमासीत्, तेनैव कारणेन बौद्ध-जैन-चार्वाकादिनास्तिकदर्शनानां च कृते भारतसमाजे अवसरो लब्धः। राजानः बौद्धं जैनं वा मतमाश्रयन् इति कारणेन सर्वे धर्मपरिवर्तनं कुर्युरिति पारतन्त्र्यं नासीत्। इत्थं प्राचीनभारतीयसमाजस्य सर्वश्रेष्ठत्वं सर्वोत्कर्षत्वं च अनुमातुं शक्यते।

मध्यकालीनभारते मुहम्मद्-शासकानां शासने राजाश्रितानां जनानां सामान्यजनानामपेक्षया समृद्धं जातं, विलासमयजीवनं, मद्यपानं,स्त्रीणां मुखाच्छादनरीतिः, योषितां शोषणं, साधारणजनतायाः शोषणम् इत्यादिकुरीतीनाम् उत्कर्षो जातः। भारतीयसमाजस्य शुभचिन्तनदृष्टिः परिवर्तिता सती स्वार्थपरायणदृष्टिः समायाता। भारतीयानाम् ऐहिकामुष्मिकसुखसाधनार्थं पवित्रकार्याचरणं यदुक्तमासीत् तद् विनष्टमिति खेदेन चाणक्यनीतौ समाजस्य भारतीयत्वसम्पादनाय एवमुपदिष्टम् अत्र लक्ष्यीकर्त्तव्यम्-

**मुहूर्तमपि जीवेच्च नरः शुक्लेन कर्मणा ।**
**न कल्पमपि कष्टेन लोकद्वयविरोधिना ॥**

आधुनिकभारते ब्रिटीश्-शासनं यदाऽऽरब्धम् अभवत् तदाऽऽरभ्य प्राचीनभारतीयसमाजस्य सर्वासां संस्थानां, सर्वेषां विश्वासानां सर्वसम्प्रदायानां च विश्वासस्य मूलोत्पाटनमारब्धम्। अनीश्वरवादः, सर्वत्र सन्देहप्रवृत्तिः, व्यक्तिवादः इत्यादिविचाराणामारम्भो जातः। तेनैव सह पाश्चात्त्यसभ्यतायाः अन्धानुकरणं, पाश्चात्त्यविज्ञानस्य आङ्ग्लभाषायाः व्यामोहस्य वृद्धिश्च समजायत। राजाराममोहनरायप्रभृतयः केचन राष्ट्रनेतारः आङ्ग्लभाषायाः पाश्चात्त्यविज्ञानस्य अध्ययनम् अस्माकं समाजस्य विकासाय महत्त्वपूर्णमिति मन्यमानाः शिक्षाक्षेत्रे परिवर्तनमानेतुमैच्छन्, केचन सनातनविचाराणामध्ययनार्थं देशीयशिक्षानीतेः समर्थनमकुर्वन्।

सन्दर्भेऽस्मिन् भारतीयसमाजस्य आमूलचूड़ं परिवर्तनं कर्त्तुं लार्ड मैकाले पाश्चात्यसंस्कृतिनिष्ठां शिक्षाप्रणालीं समुदघोषयत्, येन पारम्परिकभारतीयसमाजस्वरूपस्य सुमहान् ह्रासो जातः। तथाऽपि भारतीयसमाजे दासानामुद्धारः, समाजे स्त्रीणां समानाधिकारः, जातिभेदस्य परित्यागः, मध्यमवर्गजनानां प्रभावशाली विकासः इत्यादयः नैके विचाराः पाश्चात्यशिक्षाप्रभावेण समागताः इति सर्वे अङ्गीकुर्वन्ति। किन्तु कस्यापि देशस्य स्वसंस्कृतेश्च्युतिः, सामाजिकतायाः क्षयः देशस्यास्तित्वस्य निरन्तरतां बाधत एवेति खेदस्य विषयोऽस्ति।

स्वतन्त्र्यात् पूर्वं भारतीयसमाजे क्रान्तिकारिपरिवर्तनाय आग्रहः नावलोकितः बौद्धाः, यज्ञयागादीन् पशुहिंसादिकं च विचार्य काङ्क्षितं परिवर्तनं प्रणिन्युः। किन्तु मुगल-फारसी-डच-ब्रिटीश्-शासकानां शासनदास्यम् अनुभूय विनष्टस्य भारतीयसामाजिकस्वरूपस्य पुनरुत्थानाय युगपत् नैके महात्मानः नवजागरणं कर्तुं १९ शताब्द्यां प्रयतिरे।

तेषां प्रयासस्य परिणामेन नवभारते आध्यात्मिक-साहित्यिक-सामाजिक-राजनीतिक-आर्थिकपुनरुत्थानं बभूव। तदुद्यमे सर्वदैवास्माकं चिरस्मरणीयाः इमे भवन्ति। राजा राममोहनरायः, श्रीरामकृष्णपरमहंसः, स्वामिदयानन्दसरस्वती, स्वामी विवेकानन्दः, विश्वकविरवीन्द्रः, श्रीमुन्शी प्रेमचन्द्रः, श्री सुभाषचन्द्रबोषः, श्री गोपालकृष्णगोखले, सर सैय्यद् अहम्मद् खां, राष्ट्रपिता महात्मागान्धी, श्री बालगंगाधरतिलकप्रभृतयः सन्ति। एतेषां सततोद्यमेन सामाजिकव्यवस्थायाम् अनेकविधपरिवर्तनानि लोकहितात्मकानि एधाञ्चक्रिरे। अद्यापि नैजं योग्यं स्वरूपं धर्तुं स्वसामाजिकव्यवस्थायां भारतीयः समाजः चेष्टते।

**स्वतन्त्रभारते समाजः**

स्वतन्त्र्योत्तरकाले भारतीयसमाजे महत्परिवर्तनं नाम भारतीयसमाजः कस्याऽपि देशस्य दासो नास्ति। अतः भारतराष्ट्रं परम्परागतमूल्यानां नवीनानां च मूल्यानां समन्वयं कृत्वा सुव्यवस्थितसमाजं कर्तुं चेष्टते। सर्वादौ नवभारतीयसमाजः स्वराष्ट्रस्य संविधानानुसारी भवति। संविधानस्य ३८ धारानुसारं राज्यं जनसाधारणानां कल्याणस्य सुरक्षां कुर्यात्। सामाजिकव्यवस्था



न्यायाश्रिता भवेत्। १३ धारानुसारं केवलं धर्म-वंश-जाति-लिङ्ग-जन्मस्थानानि लक्ष्यीकृत्य नागरिकाणां विरोधे कार्याचरणं न भविष्यति। १७ धारानुसारम् अस्पृश्यतायाः बहिष्कारः क्रियते, तस्याः प्रचलनेन दण्डनीयः अपराधो भविष्यति। ४५ धारानुसारं राज्यं सर्वेभ्यः बालकेभ्यः चतुर्दशवर्षवयोवस्थायाः पूर्वमेव निश्शुल्कानिवार्यप्राथमिकशिक्षां दातुं संकल्पं कुर्यात्। संविधाननिर्माण-सभाध्यक्षाः डा. राजेन्द्रप्रसादाः वाञ्छन्ति स्म यत् "वयं भारतीयाः जातिवर्गहीनसमाजस्य स्थापनां करिष्यामः" इति संविधानस्य आदर्शरूपेण आधारा इमे भवन्ति - स्वतन्त्रता, समानता, बन्धुत्वं न्यायश्च "हिन्दु मैरिज एक्ट्" "हिन्दु सक्सेशन् एक्ट्" इत्यादिविधिनियमाः स्वीकृताः वर्तन्ते येन स्त्रीणां पारिवारिकसम्पत्तौ अधिकारः, बहुपत्नीत्वक्रमस्य विरोधः, इत्यादिस्त्रीसुरक्षोचितसमाजपरिवर्तनं स्वीकृतं वर्तते ।

प्रायः भारतीयसामाजिकव्यवस्थायां पारम्परिकमूल्यानां संरक्षण-मनिवार्यम् अस्ति। विश्वकविरवीन्द्रनाथ टैगोरमहोदयाः भारतीयस्वसामाजिक-स्वरूपस्य विघटनं दृष्ट्वाऽब्रवीत् यत् "भारतं विना विश्वं नास्ति, विशालविश्वस्य ज्येष्ठपुत्री एव भारतमाताऽस्ति। यदि भारतं भारतीयरूपस्य विकसने समर्थं न भवेत् तर्हि विश्वमेव कुण्ठितं भवेत्"। तस्मादस्माकं पारम्परिकमूल्यानां संरक्षणं कार्यमेव । तदेव हुमायूं-कबीर-महोदयैरित्थं कथ्यते-"स्वीयसांस्कृतिक-आदर्शानां पूर्णतया परित्यागः भयावहः विचारोस्ति । यदा कोऽपि देशः स्वदेशीयप्राचीनसंस्कृतिं पूर्णतया परित्यजति, तत्प्रभावो वा तत्र नश्यति तदा तद्देशवासिनां पतनं निश्चितमस्ति, तस्मात् राष्ट्रस्यास्तित्वरक्षणाय प्राचीनपरम्पराणां रक्षणमनिवार्यम्"। एतद्दृष्ट्या साम्प्रतिकशिक्षाशास्त्रिणां प्राचीनमूल्यैः सह नवीनमूल्यानां सम्मिश्रणं कृत्वा सामाजिकव्यवस्थायाः सन्तुलनं स्थापयितुं प्रयतन्ते। थामस्-महोदयेन विषयेऽस्मिन् कथितं यत्-प्राचीनार्वाचीनमूल्ययोः समन्वयार्थं प्रयासः कार्यः। स्वातन्त्र्योत्तरकाले भारतीयशिक्षायां मुख्यपरिवर्तनं कृतं यत् प्रत्ननूतनमूल्य-समन्वितशिक्षाप्रकृतिरिति । तर्हि परम्परागतमूल्यानां नवीनमूल्यानां च विमर्शः सङ्क्षिप्तरूपेण क्रियते । परम्परागतमूल्यं नाम धार्मिकः विश्वासः इति वक्तुं शक्यते, तदेव धार्मिकमूल्यमित्यपि कथ्यते । नवीनमूल्यं नाम

तात्कालिकविवेकेन समुत्पन्नं भवति, तत्र पूर्वनिर्धारितः कश्चिद्विश्वासः हेतुर्नास्ति।"

१) **परम्परागतमूल्यम्** - भारतीयसमाजस्य परम्परागतमूल्यं तु चतुर्वर्गफलप्राप्तिरेव। पुरुषेण जीवने साधनीयमिति कृत्वा एव पुरुषार्थः इति कथ्यते। पुरुषार्थः चतुर्धा वर्तते, 'धर्मार्थकाममोक्षाश्च पुरुषार्था उदाहृताः' इति अग्निपुराणे पुरुषार्थानाम् अभिप्रायोऽस्ति।

**धर्मः** – मानवानां कर्त्तव्यं यथाविधि पालनं, नैतिकविचारानुसारं जीवनयापनं, तपः, स्वाध्यायः इन्द्रियनिग्रहः इत्यादिपवित्रविचाराः अत्र भवन्ति। "धारणात् धर्ममित्याहुः" इति स्वकर्तव्यानां विश्वासः, तादृशधर्माचरणं कृत्वा प्रथमं पुरुषार्थमाप्नोति, अथवा जन्मसार्थक्यं भजते।

**अर्थः** – सन्मार्गेण वित्तार्जनं, परिवारस्य स्वस्य च उदरभरणाय क्रियमाणः प्रयासः। सामाजिकवातावरणे सुखं प्राप्य जन्मनः सार्थक्यं भजते।

**कामः** – आसुरीं वृत्तिं परित्यज्य, यथोचितसुखोपभोगः, आनन्दानुभूतिर्वा कामः कथ्यते। तेन मनः शरीरं पारिवारिकं जीवनं सामाजिकं जीवनं च सुखमयं भवति, तस्मात् आनन्दोपभोगार्थं कलात्मकं जीवनं च प्राप्तव्यम्।

**मोक्षः** – पूर्णत्वप्राप्तिः, धर्मस्य परमफलं मुक्तिरेव अस्यायमर्थः वर्तते यत् अतीन्द्रियदृष्ट्या आत्मनः अवलोकनम् आत्मसाक्षात्कारेण परमात्मना सह अद्वैतसिद्धिः, सायुज्यं वा, सांसारिकबन्धनात् मुक्तिरिति कथ्यते।

यद्यपि पुरुषार्थाः चत्वारः सन्ति। तथाऽपि च तुरीयः पुरुषार्थः सर्वैः जीवने साधयितुं शक्यते इति वक्तुं न प्रभवामः। तस्मात् धर्मार्थकामानां पुरुषार्थानां प्राधान्येन सेवनं कर्त्तव्यमिति प्राचीनानां विचारः, एतेषु त्रिषु एकमेव द्वयं वा सेवन्ते चेदपि महान् दोषः कथ्यते । तदुच्यते -

**धर्मार्थकामाः सममेव सेव्याः, यो ह्येकभद्रः स नो जघन्यः ।**
**द्वयोस्तु दाक्ष्यं प्रवदन्ति मध्यं, स उत्तमो योऽभिरतस्त्रिवर्गे ॥**

न केवलं एकस्य सेवनं गर्हितं अपितु सर्वेषां त्रयाणां पुरुषार्थानां परस्परविरोधं विना सेवनं कार्यमिति तेषां सिद्धान्तः।

**धर्मार्थौ धर्मकामौ च कामार्थौ चाम्यपीडयन् ।**
**धर्मार्थकामान्योऽभ्येति सोऽत्यन्तं सुखमश्नुते ॥**



पुरुषार्थानां सेवने धर्मस्य प्रथमपर्यायः, अर्थस्य द्वितीयपर्यायः, कामस्य तृतीयः पर्याय इत्येवं दैनिकक्रियायामानेतव्यमिति प्राचां विशिष्टः सिद्धान्तः। तथा हि -

**धर्मं पूर्वे धनं मध्ये जघन्ये काममाचरेत् ।**
**अहन्यनुचरेदेवम् एष शास्त्रकृतो विधिः ॥**
**तमसो लक्षणं कामः राजसस्त्वर्थ उच्यते ।**
**सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यमेषां यथोत्तरम् ॥**

इत्थं पुरुषार्थचतुष्टयं पारम्परिकमूल्यत्वेनाङ्गीकृतम्। आचार्यगोस्वामिमते तु ईश्वरभक्तिः पञ्चमपुरुषार्थः, स च पुरुषार्थः प्रधानश्च दृश्यते। तदुच्यते -

**दैवं पुरुषकारेण को वञ्चयितुमर्हति ।**
**दैवमेव परं मन्ये पुरुषार्थो निरर्थकः ॥**

एतेषां मूल्यानां प्राप्तये वैयक्तिकं सामाजिकं जीवनं संघटितम्। ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासाख्येषु आश्रमेषु क्रमशः जीवनयात्रां कुर्वन् वैयक्तिकं जीवनं मूल्यानां प्राप्तये व्याप्नोति। तथैव चातुर्वर्ण्यव्यवस्थया सामाजिकं जीवनं यापयन् मूल्यानि प्राप्नोति इति तेषां निर्णयः। अनेन प्रकारेण ''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन'' इति ईश्वरस्य विषये श्रद्धानः भारतीयः समाजो भवति। तस्मात् भारतीयसमाजः धर्मप्रधानसमाजः, आध्यात्मिकमूल्यकेन्द्रितश्च दरीदृश्यते।

२) **नवीनमूल्यम्** - यद्यपि परम्परागतमूल्यानि आध्यात्मिकमूल्यानि तथाऽपि विविधादर्शनविज्ञानानां सङ्गत्या, आप्तवाक्यप्रमाण्याभावात् प्राचीनमूल्यनवीनमूल्ययोर्मध्ये महान् संघर्षोऽस्ति। परस्परविरोधिमूल्ययोरनयोः विवादे, यदि पारम्परिकमेव स्वीक्रियते तर्हि प्रगतिविमुखाः भवेम, यदि च नवीनमूल्याश्रयणं कुर्मः तर्हि देशस्य स्वीयं रूपमेव नश्यति। एतादृश्यां परिस्थितौ भारतीयसमाजः प्रवर्तमानः वर्तते, अस्य स्पष्टज्ञानार्थं नवीनमूल्यानां ज्ञानमावश्यकम्, समानता, भौतिकसमृद्धिलिप्सा, व्यक्तिवादः, धर्मनिरपेक्ष-दृष्टिकोणः च नवीनमूल्यानि कथ्यन्ते।

**अ) समानता** - भारतीयसमाजे दास्यवृत्तिः, जातिवादः, भूस्वामित्वं,

स्त्रीस्वातन्त्र्यं, दुर्बलानामधिकार: इत्यादय: अस्माकं समाजे महतीं समस्यां जनयन्ति। एतदवलोक्य भारतीयसंविधानेन अनेके साम्यवादानुकूला: नियमा: प्रकटीकृता:। अनेके समाजवादिन: सरलान् उपायान् प्रावर्तयन्, राष्ट्रेण, विविधराज्यसर्वकारैश्च नानाग्रन्था: विहिता:। अल्पसंख्यकानां कृते, स्त्रीणां कृते, अनुसूचितजनजाते:, अनुसूचितजातिजनानां कृते इत्थं सर्वविध दुर्बलवर्गीयाणां समानतां सम्पादयितुं सर्वविधमारक्षणं कृतमस्ति, यथा–उद्योगक्षेत्रे शिक्षणक्षेत्रे च स्थानसंरक्षणं, मठमन्दिरादिसार्वजनिकक्षेत्रेषु समव्यवहार:, सर्वेभ्य: प्रवेश:, प्रौढशिक्षा इत्यादि सौकर्याणि कल्पितानि। भूरहितकृषकाणां कृते भूदानान्दोनलम् आचार्य विनोबाभावेमहोदयेन कृतम्। तस्य परिणामत: अनेके कृषका: कृषिकर्मार्थं सौकर्यमवाप्नुवन्। सर्वकारेण भूमिस्वाम्यधि नियम: स्वीकृत:, ये यत्र कृषिं कुर्वन्ति सा भूमिस्तेषामेव भवति इति। परिणामत: सर्वे च सामाजिका: समानस्तरं प्राप्तुं यत्नशीला: दृश्यन्ते। "समानमस्तु वो मन:" इति श्रुत्युक्ति: साम्प्रतिकसमाजे अन्वर्थतां भजते।

**आ ) भौतिकसमृद्धिलिप्सा** – "अर्थमूलं जगत्सर्वम्" इत्यस्मिन् सूत्रे सर्वेऽद्य बद्धा: दृश्यन्ते। समानतामूल्यमेतन्मूल्यस्य कारणं, सर्वे वयं समाना: अस्माभि: स्वसामर्थ्येन किमपि कर्तुं शक्यते । सर्वै: सह समत्वप्राप्तये अधिकाधिकभौतिकसमृद्धिरपेक्ष्यते । भौतिकसम्पद् आधिक्येन जीवनस्तरस्य संवर्धनं कर्तुमिच्छति। तस्माद् अद्य कृषको वा कार्मिको वा भवतु नवीनवैज्ञानिकपद्धत्या नवीनयन्त्राणां बैंक (धनालय) साहाय्येन च उत्पादनक्षमतावर्धनतत्परो दृश्यते। सर्वकार: स्वराष्ट्रस्य संसारं समुन्नतं कर्त्तुं स्वसमाजस्य भौतिकसमृद्धिसम्पन्नतां वर्धापयति।

**इ ) व्यक्तिवाद:** – समानतामूल्येन भौतिकसमृद्धिमूल्यं, तेन च व्यक्तिवाद: एव प्रवर्तते। भारतीयसमाजे विविधा: संस्था: या: वर्तन्ते, तदधीन: पुरुष: स्यात् इति पूर्वमासीत् इदानीं प्रजातन्त्रस्य दृढतायै व्यक्तिवाद: नवीनमूल्यत्वेन समागत:। सर्वे मनुष्या: स्वेच्छानुसारं वृत्त्यन्वेषणं कर्तुं शक्नुवन्ति। अनिच्छया परम्परागतं कर्म कुर्वन्त: अनुशयं न कुर्वन्ति। दम्पती अपि परस्परं स्नेहेन एकत्र वर्तितुं शक्नुत: अथवा अन्यत्र पृथग्भूय तिष्ठत:। पुरुष: स्त्री वा स्वीयं स्वतन्त्रम् अस्तित्वमङ्गीकरोति। कोऽपि कमपि व्यवसायं कर्तुं



शक्नोति इति सामाजिकपरम्पराशृङ्खलां परिहृत्य स्वनिर्णयानुसारं स्वीकर्तुं शक्नोति। एतादृशा: स्वैरिणो भवन्ति चेत् राष्ट्रे प्रजातन्त्रव्यवस्था सुस्थिरा भवतीति नवचिन्तनधाराऽस्ति। यतो हि परागवलम्बनं परतन्त्रानुसरणं च प्रजातन्त्रस्य बाधकमितीदं मूल्यमद्य स्वीकृतमस्ति। तेनाद्य स: अशिक्षितो वा शिक्षितो वा भवतु, धनी निर्धन:, बाल: योषिद् य: कोऽपि वा भवतु स:/सा स्वीयं गौरवं सर्वाधिकमसाधारणमिति मनुते। स्वकार्यस्य स्वयमेवोत्तरदायीति सधैर्यं स्वीकरोति।

**ई ) धर्मनिरपेक्षदृष्टिकोण:** – वस्तुत: सम्प्रति राष्ट्रे सर्वे राजनीतिज्ञा: धर्मनिरपेक्षवादमङ्गीकृत्य धर्मनिरपेक्षवाद:, धर्मनिरपेक्षदृष्टिकोण: इति उच्चै: प्रचारं कुर्वन्तो भवन्ति। प्राय: अनेके एतन्मूल्यार्थं धर्मपरित्याग:, धार्मिककार्याचरणं मास्तु, इत्यादिविविधार्थान् कथयन्ति। आङ्ग्लभाषायां सेक्युलर इति पदं तत्र प्रयुज्यते, सेक्युलर इति पदस्य श्री वी. एस्. आप्टेमहोदयानाम् आंग्लसंस्कृतशब्दकोशे अर्थो दत्तोऽस्ति सांसारिक:, प्रपञ्चानुराग: इति तत्रेदं नोच्यते धर्मविरोध:, धर्मपरित्याग: इति। भारते देशे नानाधर्मा:, धर्मावलम्बिनश्च निवसन्ति। यद्यपि सर्वेषामपि धर्माणां लक्ष्यमेकमेव।

**रूचीनां वैचित्र्याद् ऋजुकुटिलनानापथजुषां ।**
**नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥**

इति न्यायेन सर्वेषाम् ईश्वरदर्शनमेव लक्ष्यम् अस्ति, तथापि समाजे परस्परविरोधाय धर्मा: कारणानि भवन्तीति दृष्ट्वा राष्ट्रनेतार: सर्वधर्मसमन्वयं कर्तुं नवभारते प्रायतन्त। राष्ट्रपिता महात्मागान्धीमहोदय: ''रघुपति राघव राजाराम ईश्वर अल्ला तेरो नाम'' इति प्रसिद्धभजनगीतां धार्मिकसमत्वं साधयितुं पपाठ।

धर्मनिरपेक्षदृष्टिकोणो नाम कस्यापि धर्मस्यावहेलनं न कर्त्तव्यम्। सामाजिकक्षेत्रे कस्यापि धर्मस्य प्राधान्यं न भवेदिति । किन्तु सर्वे मानवा: स्वस्वधर्मश्रद्धालवो भवेयु: । अन्यथा बहुधर्मावलम्बिदेशेऽत्र वृथा कलहा: एव जायेरन्। एवमद्य भारतीयसामाजिकव्यवस्थायां पारम्परिकनवीनमूल्ययो: स्वीकार:, विरुद्धमूल्ययो: संघर्षश्च जायमानो वर्तते। प्राय: परम्परागतमूल्यस्य

विलोपश्च जायमानोऽस्ति।

**नवभारतसमाजस्य स्वरूपम्**

सम्प्रति विज्ञानस्य प्रगत्या, प्रविधीनाम् उत्कर्षेण, नानादेशसंस्कृति-प्रभावेण राजनैतिकलौकिकसामाजिककारणैश्च भारतीयसमाजस्य स्वरूपं बहुपरिवर्तितं सन्दृश्यते। तत्र केचन इमे विशेषाः उदाह्रियन्ते ।

१) जातिसम्प्रदायनियमाः शिथिलाः सञ्जाताः। तथाऽपि मतधर्मकलहान् राजनीतिनिपुणाः उद्भावयन्ति। हिन्दूनां मन्दिरेषु मुस्लिमजनाः मस्जिदित्याख्येषु हिन्दवः स्नेहपूर्वकं विश्वासपूर्वकं गमनागमनं कुर्वन्ति, भ्रातृत्वमङ्गीकुर्वन्ति। किन्तु तद्विघटनं सरलतया राजनीतिविचक्षणाः कुर्वन्ति।

२) स्त्रीस्वातन्त्र्यं प्राप्तमस्ति। अद्य अबलाः दुर्बलाः न सन्ति। ताः विद्याक्षेत्रे, विज्ञानक्षेत्रे, उद्योगक्षेत्रे, राजनीतिकक्षेत्रे सुमहत्स्थानं प्राप्नुवन्ति। बाल्यविवाहः समाप्तः, बालविवाहः पुरुषस्य वा योषितो वा न्यायविरुद्ध इति निर्णयो जातोऽस्ति। विधवापुनर्विवाहः, विवाहविच्छेदः, इत्यादिनवादर्शाः स्वीकृताः सन्ति।

३) व्यक्तिवादप्रभावेण औद्योगिकीकरणकारणेन अविभक्तकुटुम्बस्वरूपं विनष्टं, लघुलघुपरिवाराः सञ्जाताः।

४) परिवारकर्त्तव्यानि प्रायः वैज्ञानिकचिन्तनानुसारेण क्रियन्ते, यथा शिशूनां पालनं मातृणामपेक्षया शिशुगृहेषु प्रशिक्षिताः कुर्वन्ति। (Baby Sitting) मध्ये शिशुविकासो जायते। परिवारेण प्रदीयमानां शिक्षां गृहेषु दूरदर्शनं करोति। मनोरञ्जनपद्धतिः परिवर्तिताऽस्ति। वृद्धमातापितृणां शुश्रूषा वृद्धाश्रमेषु जायन्ते। इत्थं प्राचीनपम्परागतपरिवारापेक्षया नवीनपरिवारस्वरूपं विलक्षणं वर्तते।

५) यद्यपि जातिनियमाः शिथिलाः, तथापि समाजे जातिवादः, साम्प्रदायिकसंकीर्णता, क्षेत्रवादः, भाषावादः इत्यादिविघटनकारिप्रवृत्तयः प्रत्यहमेधन्ते।

६) भारतीयसामाजिकसंरचनायाम् अनेककार्यकर्तृणां पदेषु सामुदायिकभावना अपचीयते। केवलं स्वार्थाय संबन्धाः जायमानाः दृश्यन्ते।



"लोकहितं मम करणीय" मिति ध्येयं सामाजिककार्यकर्तृषु नावलोक्यते। प्राचीनसमाजे वणिक् साधुकारः कथ्यते स्म। अद्य वणिक् लोकहितापेक्षया स्वार्थदृष्ट्या पदार्थेषु अनुचितमिश्रणं कृत्वा समाजघाती (असाधुकारः) दृश्यते।

७) ग्रामीणसंस्कृत्यपेक्षया नगरसंस्कृतिः ग्रामप्रधाने भारतदेशे समागतः। विदेशमुखाः राष्ट्रप्रेमरहिताः भारतीयाः जायमानाः वर्तन्ते। इत्थं नवभारते सामाजिकस्वरूपं बहुपरिवर्तितमस्ति। परम्परागतमूल्यं मृगमरीचिकेव दृश्यते। पाश्चात्यानां संस्कृत्या विचारेण च बहुप्रभावितं वर्तते। नवभारतीयसमाजस्य निर्माणाय राष्ट्रकल्याणकारिभिः बहुचिन्तनपूर्वकं संविधानं विरचितम्। तत्रत्यं मूलसूत्रं "वर्गरहितसमाजस्य स्थापनम्"। तत्सूत्रप्रणीतसमाजस्वरूपं जायमानमस्ति।

❊

# एकं सांख्यं च योगं च

डॉ० मधुबाला सिन्हा

श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन स्वभक्तायार्जुनाय स्वकर्तव्यपथमुपदिशता सांख्ययोगशब्दौ बहुधा प्रयुक्तौ। शब्दाविमौ भारतीयदर्शने प्रस्थानविशेषार्थे प्रयुक्तौ भवतः। अत्रेयं विचारणीयमस्ति यत् उभयत्र अनयोः प्रवृत्तिनिमित्तविषये साम्यं वैषम्यं वा।

सांख्यशब्दः संख्याशब्दात् निरुच्यते यत्र च समित्युपसर्गात् सम्यक् इति प्रतीतिः, ख्याशब्दाच्च ख्यातिः इति ज्ञानपर्यायरूपोऽयं शब्दः। अर्थात् सम्यक् ख्यातिः संख्येति कथ्यते। यया सम्यक् ख्यातिः भवति सा विद्या सांख्यरूपेण प्रतिपादिता भवति। कपिलप्रवर्तितं सांख्यदर्शनं खलु दर्शनान्तरेषु सम्यक् ख्यातिं विशेषेण निर्वहति यत्र पञ्चविंशतितत्त्वानि स्वीकृतानि। तत्त्वगणनाविशिष्टेन संख्येति पदं सार्थकं भवति। संख्यया प्रवर्तितं सांख्यशास्त्रं दर्शनान्तरेभ्यः समीचीनतरं ज्ञानं प्रयच्छति सांख्यसंग्रहे उद्धरणमिदं प्राप्यते –

**पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे रतः ।**
**मुण्डी जटी शिखी वापि मुच्यते नात्र संशयः ॥**

सांख्यासांशास्त्रे चेतनतत्त्वस्य पुरुषस्य अचेतनायाः प्रकृतेश्च संयोगेन सृष्टिप्रक्रिया प्रारभते, तस्यामेव अन्यानि त्रयोविंशतिः तत्त्वानि प्रादुर्भवन्ति, येन संकलनया तत्त्वानां संख्या पञ्चविंशतिरेव भवति। एवं सांख्यं ज्ञानपर्यायं सत् श्रेष्ठज्ञानरूपमपि लोकेषु प्रयुज्यते। उक्तं च – **"नास्ति सांख्यसमं ज्ञानम्"** इति । इदमेवाभिप्रेत्य भगवता कृष्णेन श्रेष्ठस्य ज्ञानस्य संज्ञा सांख्यमिति दत्तेति प्रकटयिष्यते। अपरत्र योगशब्दः पातञ्जलदर्शने चित्तवृत्तिनिरोध इति रूपेण प्रयुक्तो वर्तते (पातञ्जलयोगदर्शनम् – 1.2)।

तत्र चित्तं प्रकृतेः सत्त्ववृत्तिविशेषः प्रतिशरीरं वर्तते। मानवेषु चित्तस्य महत्त्वात् मनोविज्ञानमपि शास्त्रविशेषरूपेण प्रवर्तितं प्राचीनैरर्वाचीनैश्च विपश्चिद्भिः। चित्तस्य नानावृत्तयः सम्भवन्ति किन्तु संकलनया पञ्चैव वृत्तयः पतञ्जलिना योगसूत्रे स्वीकृताः यथा – **प्रमाणविपर्ययविकल्प-निद्रास्मृतयः** इति। मानवः सर्वदा एकस्यां कस्यामपि वृत्तौ वर्तते इति न संशयः। व्युत्थानावस्थायाः अयमेव विशेषः यत् मानवः प्रमाणे वा विपर्यये वा विकल्पे वा निद्रायां वा स्मृतौ वा वर्तते एव। समाहितचित्तस्य अवस्थायामेव ता वृत्तयो विरमन्ति। यदा चित्तं कस्याञ्चन वृत्तौ परिणमते तदा तत्रात्मनः प्रकाशः पतति। प्रकाशपातेन तदात्मेव प्रतीयते। समाहितावस्थायाम् आत्मनः स्वरूपावस्थानं भवति,[1] किन्तु व्युत्थानावस्थायाम् अर्थात् सामान्यव्यवहारे वृत्तिसारूप्यं चित्तस्य भवति, तेन माध्यमेन आत्मापि तद्रूपेण प्रतीयते इति दिक् ।

योगः सामान्यरूपेण व्यावहारिकं मार्गमाश्रयते। तत्र ज्ञानपक्षः सिद्धान्तपक्षो वा सांख्यसदृशः एव। किन्तु व्यवहारपक्षः साधनपक्षः विशेषरूपेण वर्तते इति तयोः भेदः। तथापि सांख्यानां योगानाञ्च समानं लक्ष्यमिति न विस्मरणीयम्। अत एव पूर्वोक्तस्य श्लोकांशस्य अपरो भागो वर्तते – **नास्ति योगसमं बलम् ।**

सांख्यदर्शने योगदर्शने च प्रकृतिपुरुषयोः पार्थक्यं प्रतिपादितं भवति, समाधानं च प्रकृतिवियोगेन पुरुषस्य स्वरूपावस्थानमिति उभयत्र मन्यते। उक्तं च राजमार्तण्डवृत्तिकृता भोजराजेन स्वव्याख्यानस्य मङ्गलाचरणे –

पतञ्जलिमुनेरुक्तिः काप्यपूर्वा जयत्यसौ ।
पुंप्रकृत्योर्वियोगोऽपि योग इत्युदितो यया ॥

विवेचनात् इदमापतति यत् सांख्यशब्दः ज्ञानापरपर्यायः योगशब्दश्च समाधिरूपेण आत्मनः शुद्धतालाभाय क्रियमाणः साधनविशेषः लक्ष्यविशेषश्च। अर्थात् क्रियाविशेषः कर्मविशेषो वा योगः, येन आत्मनः स्वरूपलाभः कैवल्यं वा प्राप्येत।

वस्तुतः संसारचक्रमापन्नः प्राणी दुःखविशेषैः चित्तवृत्तिचक्रैः वा



आक्रान्तः तस्मात् मोचयितुमात्मानमिच्छति, अत एव क्रियाविशेषं ज्ञानविशेषं च सर्वदा कामयते। तत्र क्रियाविशेषः व्यवहारतो योगशब्देन, ज्ञानविशेषश्च सांख्यशब्देन अभिधीयेते। तमर्थमभिप्रेत्य भगवान् कृष्णः गीतायां स्वशिष्याय अर्जुनाय कर्मयोगं ज्ञानयोगञ्चोपादिशत्।

गीतायाः द्वितीयाध्याये योगस्य द्विविधं लक्षणं प्रायेण एकत्रैव प्रदत्तं श्रीकृष्णेन – **समत्वं योग उच्यते** (गीता 2.48), **योगः कर्मसु कौशलम्** (गीता 2.50)। पूर्वत्र सर्वाणि कर्माणि शास्त्रप्रतिपादितानि कुर्वन् मानवः कर्मसाफल्ये तद्वैफल्ये वा अर्थात् फलस्य लाभेऽलाभे वा समानतामनुभवति चेत् तदा वस्तुतः योगसम्पन्नः अर्थात् समाहितचेताः साधको वर्तते। किन्तु तदर्थं महती साधना कर्मविषये चित्तस्थैर्यविषये च अपेक्षिता भवति। प्रसङ्गेऽस्मिन् भगवान् शंकराचार्यः व्याचष्टे –

**फलतृष्णाशून्येन क्रियमाणे कर्मणि सत्त्वशुद्धिजा ज्ञानप्राप्तिलक्षणा सिद्धिस्तद्विपर्ययजाऽसिद्धिस्तयोः सिद्ध्यसिद्ध्ययोरपि समस्तुल्यो भूत्वा कुरु कर्माणि।**[2]

पातञ्जलयोगदर्शनेऽपि समाहितचित्तस्य साधकस्य प्रतिक्रिया कर्मसाफल्ये तद्वैफल्ये वा समाना भवति इति प्रतिपादयन्ति योगनीतिविशारदाः। अतः गीतायां योगशब्देन कर्मयोगः अर्थात् निष्कामकर्मयोगः प्रतिपादितः। स च योगः व्यवहारदृष्ट्या अध्यात्मदृष्ट्या च महद् बलं प्रददाति जीवनसंचालनाय। तदेवाभिप्रेत्य कृष्णः अपरस्मिन् योगलक्षणे कथयति –

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥[3]

समत्वविषया बुद्धिः यत्र प्रवर्तते तया युक्तः पुरुषः कर्माणि कुर्वन् न पुण्यं प्राप्नोति न च पापम्। उभयत्र तस्य समानता वर्तते। स्वधर्मरूपेण फलकामनाविरहितं कर्म कुर्वन् मानवः ईश्वरार्पणबुद्धिं धारयति। तदा स सर्वेषु कर्मसु कुशलतां प्राप्नोति। तदेव कौशलं वर्तते यत्र बन्धनस्वभावान्यपि कर्माणि समत्वबुद्ध्या स्वभावात् निवर्तन्ते । अनेन

योगशब्दस्य निर्गलितार्थः अयमेव भवति यत् कर्म समत्वबुद्ध्या फलकामनाराहित्येन ईश्वरार्पणबुद्ध्या वा सम्पादनीयम्। तदेव कर्म मोक्षसाधनं भवति। अतः योग-शब्दः कर्मयोगपरः।

सांख्यशब्दस्य ज्ञानपरः अर्थः इत्युक्तं पुरस्तात्। कृष्णः गीतायां द्वितीयाध्याये अर्जुनाय प्रारम्भिकं जीवात्मनित्यताविषयकम् उपदेशं दत्त्वा कथयति –

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥[4]

अर्थात् परमार्थवस्तुविवेकविषये या बुद्धिः ज्ञानं भवति सा साक्षात् संसारहेतुदोषनिवृत्तिकारणम्। ज्ञानविषयं सांख्यमित्यर्थः। यथा – आत्मनो नित्यताज्ञानम्, संसारस्य एकैकस्य पदार्थस्य ईश्वरनियाम्यत्वम्[5], सांसारिकः कर्तव्यबोधः, सर्वेषु प्राणिषु आत्मदर्शनम्, आत्मनि च सर्वभूतदर्शनम् इत्यादि।

एतेन सांख्यस्य व्यावहारिकः अर्थः ज्ञानयोगः, योगस्य च तादृशः अर्थः कर्मयोगः। सम्प्रति विचारणीयं यत् प्रसङ्गेऽस्मिन् कर्म वा ज्ञानं वा समानार्थकम् उत भिन्नार्थकम्। भगवद्गीतायाः पञ्चमाध्याये कर्मसंन्यास-योगाख्ये कृष्णः कर्मसंन्यासमेव सांख्यशब्देनाभिधत्ते। योगशब्दस्तु कर्मयोगरूपेण स्पष्टीकृतः। कर्मणां संन्यासः सांख्ययोगः इति भूयो भूयः तत्र निरूपितः। निम्नाङ्कित श्लोके कृष्णः प्रतिपादयति यत् सांख्योगात् कर्मयोगस्य वैशिष्ट्यं नूनं वर्तते –

संन्यासः कर्मयोगश्च निःश्रेयस्करावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥[6]

अर्थात् कर्मणां परित्यागः कर्मयोगश्च एवं च तावुभावपि निःश्रेयसं मोक्षं कुर्वाते, ज्ञानोत्पत्तिहेतुत्वात्। तथापि तयोः निःश्रेयसकारणयोः योगयोः केवलात् कर्मसंन्यासात् कर्मयोगः साधीयान् भवतीति कर्मयोगस्य स्तुतिः। कर्मयोगी न द्वेष्टि न च किमपि काङ्क्षति। दुःखं प्रति द्वेषः सुखं प्रति आकांक्षा इति सामान्यानां जनानां स्थितिः। किन्तु कर्मयोगी नित्यसंन्यासी भवतीति कर्मणि वर्त्तमानोऽपि तस्मात् पृथगेव वर्तते निष्कामत्वात्।[7]



इत्थं कृष्णः सांख्ययोगस्य कर्मसंन्यासरूपस्य साधकस्य कर्मयोगस्य निष्कामकर्मणश्च एकत्वं तर्कबलेन निरूपयति। अयमभिप्रायः – कर्मसंन्यासी अर्थात् सांख्ययोगी सर्वथा कर्मणां परित्यागं करोति, फलं भवतु वा न वा भवतु इति विषये तस्य प्रवृत्तिरेव नास्ति, कर्मणः साकल्येन त्यागात्। अपरत्र कर्मयोगी कर्माणि सम्पादयति, केवलं फलं न कामयते इति तस्यापि प्रकारान्तरेण कर्मसंन्यासः एव।[8] अत एव उभयोः पक्षयोः साम्यं वर्तते। एतदभिप्रेत्य गीतायाः अग्रिमे श्लोके अभिहितम् –

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥[9]

अत्राभिप्रेतं यत् बालाः अल्पज्ञानवन्तः एव जनाः सांख्ययोगौ कर्मसंन्यासकर्मयोगौ परस्परविरुद्धभिन्नफलौ कथयन्ति। किन्तु ज्ञानिनः दर्शनदृष्टिसम्पन्नाः विपश्चितः एकं फलमविरुद्धमिच्छन्ति। कथमेतत् ? एकमपि सांख्ययोगयोः सम्यगास्थितः सम्यक् अनुष्ठितवान् पुरुषः उभयोः फलं निःश्रेयसरूपम् अविरुद्धं लभते। निःश्रेयसरूपे फले कर्मयोगे सांख्ययोगे च नास्ति विरोधः। दर्शनमतेन निःश्रेयसं कैवल्यम् एकस्य आत्मनः स्वरूपावस्थानं चित्तवृत्तीनां सर्वासां निरोधरूपं पदम्।

कृष्णः तद्विषये पुनरपि स्वकीयं प्रमाणप्रतिपादितं मतमुपस्थापयति यत् ज्ञाननिष्ठः सांख्यैः संन्यासिभिः मोक्षारण्यं स्थानं लभ्यते तदेव स्थानं कर्मयोगिभिरपि लभ्यते। तस्य हेतुः – कर्मयोगिनः ज्ञानप्राप्त्युपायत्वेन ईश्वरे सर्वाणि कर्माणि समर्पयन्ति, फलमनभिसंधाय अनुतिष्ठन्ति। तेऽपि परमार्थज्ञानसंन्यासप्राप्तिमुखेन तदेव मोक्षरूपं पदं बन्धनं विहाय प्राप्नुवन्ति। अत एव दार्शनिकैः सदैव सांख्ययोगः कर्मयोगश्च समानस्तरेण दर्शनीयाविति भगवता निरूपितम् –

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥[10]

कृष्णोक्तस्य वचनस्य अतिदेशः क्रियते चेत् भारतीयदर्शने सांख्ययोगशब्देन निरूपितौ प्रस्थानविशेषावपि फलविषये साम्यं धारयतः।

तथाहि सांख्यदर्शनस्य फलं कैवल्यं निःश्रेयसरूपम्। योगदर्शनस्यापि फलं तदेव कैवल्यम् इति न संदेहः। कैवल्यावस्थायां पुरुषः प्रकृतेः सर्वथा पृथक् स्वरूपेण तिष्ठति इति स्थितिः। सांख्यकारिकायाम् ईश्वरकृष्णः प्रतिपादयति यत् तत्त्वाभ्यासात् पुरुषस्य केवलं ज्ञानं विशुद्धं जायते, तदेव कैवल्यं प्राप्यते। तथाहि –

एवं तत्त्वाभ्यासात् नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद् विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥[11]

गीतोक्तसांख्ययोगेऽपि तादृशमेव निःश्रेयसं कर्मसंन्यासात् प्राप्यते यत्र संन्यासी आत्माभिमानरहितो जायते।

अपरत्र पातञ्जलयोगदर्शनेऽपि कैवल्यं योगस्य फलम्। तत्रापि पुरुषस्य प्रकृतिविवेकः तत्पार्थक्यं च अनिवार्यम्। तदेवात्मनः स्वरूपावस्थानम्। सांख्यदर्शनं साधनं प्रति निर्विकारं वर्तते, योगदर्शनं तु साधनानि अष्टाङ्गरूपेण निरूपयति येषां क्रमशः सोपानमार्गेण आरोहणात् अन्ततः निर्बीजसमाधि रूपेण पुरुषस्य कैवल्यं निश्चितं भवति। योगस्य साधनं प्रति विशेषाभिनिवेशात् गीतायां कर्मयोग इति विवरणविशेषः। इत्थं सांख्ययोगदर्शने केवलमुपक्रमविषये भिन्ने स्तः, फलविषये तु कैवल्यारण्ये समाने एव। गीतायामपि सांख्यं कर्मसंन्यासरूपम् उपक्रमविषये कर्मयोगात् कर्मणः फलाभिसंधानरहितत्वेन सम्पादनात् ईषद् भिन्नं प्रतीयते किन्तु यत्र फलस्य विवेचनं तत्रोभयोः समानता इत्युपपादितं पुरस्तात्। आधुनिको दार्शनिकः हिरियन्नामहोदयः गीतायाः कर्मयोगम् इत्थं व्याचष्टे – गीतोपदेशः ''कर्मणः'' त्यागं न शिक्षयति, प्रत्युत ''कर्मणि'' एव त्यागं शिक्षयति।[12] अत्र नूनमेव कृष्णस्य वचनमेव वर्तते यत् कर्मसंन्यासात् कर्मयोगः विशिष्टः इति।[13]

एवं प्रतिपादितं भवति यत् समानतन्त्रयोः सांख्ययोगयोः गन्तव्यमभिन्नम् –

एकं सांख्यं च योगं च यः पश्यति स पश्यति ।



## सन्दर्भसूची


1. योगसूत्रम् १/५, तदा द्रष्टुः स्वरूपेऽवस्थानात्।
2. शाङ्करभाष्यम्, श्रीमद्भगवद्गीता २/४८
3. श्रीमद्भगवद्गीता २/५०
4. तथा २/३९
5. तुलनीयम् – ईशावास्योपनिषद् १, ईशावास्यमिदं सर्वम्
6. श्रीमद्भगवद्गीता ५/२
7. शाङ्करभाष्यम्, श्रीमद्भगवद्गीता ५/३
8. श्रीमद्भगवद्गीता ६/१

   अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
   स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥
9. " ५/४
10. " ५/५
11. सांख्यकारिका ६४
12. Dr. C.D. Sharma - A Critical Survey of Indian Philosophy (1976), P. 35
13. श्रीमद्भगवद्गीता – ५/२


❋

# वृत्तयः काव्यमातरः

डा० (श्रीमती) आभा सिंहः

संस्कृतसाहित्यशास्त्रे वृत्तीनां व्यापकविवेचनं लभ्यते। वृत्तिपदम् अनेकार्थकम् अस्ति। निरुक्तकारः यास्कः धात्वर्थमेव वृत्तिं मनुते - **अर्थनित्यः परीक्षेत। केनचित् वृत्तिसामान्येन।**[1] किन्तु आचार्यपतञ्जलेः मतेन शास्त्रीयग्रन्थेषु वर्णितविधेः अनुरूपं क्रियमाणं वैज्ञानिकम् अनुसंधानम् एव वृत्तिः - **का पुनर्वृत्तिः। वृत्तिः शास्त्रप्रवृत्तिः।**[2] अनेकानि पदानि यत्र प्रतिपदगतम् अर्थं परित्यज्य एकं नवीनम् अर्थं बोधयन्ति, तत्र सा स्थितिः 'वृत्तिः' इति कथ्यते - **परार्थाभिधानं वृत्तिः।**[3] साहित्यशास्त्रे एतेभ्यः अर्थेभ्यः भिन्ने अर्थे 'वृत्ति', शब्दः गृहीतः अस्ति। तत्र वृत्तेः तात्पर्यम् इत्थम् अस्ति- वर्ततेऽनया इति वृत्तिः अर्थात् 'व्यापारः'।

साहित्यशास्त्रस्य ग्रन्थेषु वृत्तीनां विषये व्यापकः विमर्शः उपलभ्यते। वृत्तयः नाट्यस्य आधाराः सन्ति इति आचार्यभरतः।[4] चतसृषु वृत्तिषु नाट्यम् अवलम्बितम् अस्ति इति लिखित्वा भरतमुनिः नाऽतुष्यत्। अग्रे तेन गदितं यत् वृत्तयः न केवलं नाट्यस्य अपितु सम्पूर्णकाव्यस्य मातरः सन्ति।[5] अत्र अभिनवगुप्तपादस्य व्याख्या द्रष्टव्याऽस्ति- ''सर्वेषाम् अभिनेयानभिनेयानां च काव्यानां वृत्तयः इष्टा मातर इव ताभ्यो वाच्यरूपत्वेन कविहृदयव्यवस्थिताभ्यः काव्यम् उत्पद्यते।'' साहित्यदर्पणकारः वृत्तीः नाट्यमातृरूपेण स्वीकरोति।[6] दशरूपक-काव्यप्रकाशादिषु साहित्यशास्त्रस्य अन्येषु ग्रन्थेषु अपि वृत्तीनां गहनं विवेचनम् उपलभ्यते, किन्तु एतत् तथ्यम् आश्चर्यजनकम् अस्ति यत् वृत्तीनां तथा महत्त्वपूर्णायां स्थितौ अपि एतेषु ग्रन्थेषु तेषां महत्त्वं यथोचितं न प्रदर्शितम् अस्ति।

अत्र वृत्तेः स्वरूपम् आदौ अवलोकनीयम् अस्ति। उपरि उल्लिखितं यत् साहित्यशास्त्रे वृत्तेः अर्थः 'व्यापारः' एव । दैनिकजीवनगतव्यापारस्य नाटकगतव्यापारस्य च मध्ये भेदः अस्ति। नाटकादौ क्रियमाणानां गायन-वादन-रस-भावादीनाम् अभिनयः नृत्यानां विविधाः प्रकाराश्च येन विशिष्टेन क्रमेण प्रस्तुताः भवन्ति सः 'वृत्तिः' इति कथ्यते ।[7] भोजराजस्य मतेन वृत्तयः एव अलङ्काराः । चित्तस्य विकासे विक्षेपे सङ्कोचे विस्तारे च या विद्यमाना भवति सा एव वृत्तिः।[8] एतत् मतं किंचित् स्पष्टीकृत्य टीकाकारः राजेश्वरः वदति यत् काव्यं रसात्मकं भवति, अतः वृत्तयः रसविषयकस्य नायकस्य व्यापाराः भवन्ति ।[9] वृत्तेः कृते 'व्यवहार' शब्दं प्रयुनक्ति आनन्दवर्धनाचार्यः।[10]

एताः वृत्तयः नाटक-नायकेति उभयोः इष्टसिद्धौ सहायिकाः भवन्ति। काव्यं रसप्रधानं भवति। काव्यत्वात् नाटकम् अपि रसभावयोः व्यापारेण अभिनयेन च पूर्णं भवति। रसोचितः प्रयत्नविशेषः एव नाटकवृत्तिः इति कथ्यते ।[11] एताः वृत्तयः एव सन्ति याः रसतात्पर्येण युक्ताः सत्यः काव्ये अथवा नाट्ये चमत्कारिताम् उत्पादयन्ति ।[12] तया चमत्कारितया काव्यस्य श्रेष्ठत्वं सिध्यति। न केवलम् एतत्, अपि तु एताः रसस्य अवस्थाः अपि सूचयन्ति ।[13] वस्तुतः वृत्तयः रसस्य भावस्य अभिनयानां च अनुगामिन्यः भवन्ति ।[14]

नायकस्य कृतेऽपि वृत्तीनां महत्त्वं ध्यातव्यमस्ति। व्यापारः एव वृत्तेः अर्थः इति चेत् कस्य व्यापारः इति जिज्ञासायां सत्यां दशरूपककारः समाधत्ते - **तद्व्यापारात्मिका वृत्तिः**। 'तत्' शब्देन नायकस्य बोधः। प्रवृत्तिरूपो **नेतृव्यापारः स्वभावः वृत्तिः** इति दशरूपकावलोकटीकायां धनिकः। एतेनेदं स्पष्टं यत् नेतुः प्रवृत्तिरूपो व्यापारः एव वृत्तिः। निवृत्तिरूपः व्यापारः तु वर्णयितुं' न शक्यते । अत्र नेतृपदम् इतरपात्राणाम् उपलक्षणमेव । अतः सर्वेषां पात्राणां प्रवृत्तिरूपः व्यापारः एव वृत्तिः। पात्राणां गमनाऽगमनादिवृत्तेः परिधौ परिगणितं न भवति। केवलं पुरुषार्थसाधको व्यापारः एव वृत्तिः भवेत् इति नाट्यशास्त्रम् ।[15] दशरूपककारोऽपि एतदेव मतं पोषयतीति प्रतीयते ।[16] अभिनवभारती अपि समविचारम्



अभिव्यनक्ति ।[17] अत्रेदं स्मरणीयं यत् धर्मार्थकाममोक्षेति चतुर्विधेषु पुरुषार्थेषु काव्यं प्रथमपुरुषार्थत्रयस्य एव साधकम् अस्ति ।[18]

वृत्तयः रसभावाभियगाः भवन्ति । आनन्दवर्धनः तत्र औचित्यम् अपि योजयति । तस्य मतेन यः व्यवहारः रसानुरूपः औचित्यवान् वाच्याश्रयः अस्ति सः एव वृत्तिः ।[19] एषा वृत्तिरेव काव्ये अनिर्वचनीयां शोभां जनयति ।[20]

वृत्तयः एव व्यापाराः, पात्रगतव्यापाराणां वर्णनम् एव काव्यम् इत्यतः वृत्तीनां काव्यमातृकत्वं स्वतः सिध्यति।[21] व्यापारः त्रिविधः भवति-कायिकः वाचिकः मानसिकश्च । कस्मिंश्चिदपि काव्ये एते त्रयः साङ्कर्येण भवन्ति। यत्र यस्य प्राधान्यं तत्र सः व्यापारः स्वीक्रियते-प्राधान्येन व्यपदेशाः भवन्ति इति नियमात् । सात्त्वती कैशिकी चेति कायिकव्यापारत्वेन स्वीक्रियेते, तयोः शारीरिकक्रियायाः प्राधान्यात्। रसप्रधानत्वेन आरभटी मानसिकव्यापारः अस्ति, संवादप्रधानत्वेन च भारती वाचिको व्यापारः इति स्वीक्रियते। तासु वृत्तिषु भारती सर्वत्र भवति, संवादं विना काव्यस्य अप्रवृत्तेः, अत उक्तम् **वृत्तिः सर्वत्र भारती।**

कैशिकी-भारती-सात्त्वती-आरभटी इति चतस्रः वृत्तयः अभिनवगुप्तपादेन एवं वर्णिताः सन्ति-पाठ्यप्रधाना भारती, अभिनयप्रधाना सात्त्वती, अनुभावाद्यावेशमया रसप्रधाना आरभटी, गीतवाद्योपरञ्जकप्रधाना च कैशिकी इति । भारतीवृत्तौ संवादतत्त्वस्य प्राधान्यम्, आरभटी उद्धतरसयुक्ता भवति । सात्त्वती अभिनयप्रधाना, कैशिकी च गायनवादनप्रधाना भवति । नाट्यदर्पणकारः वृत्तीनां व्युत्पत्तिं दर्शयन् अभिधत्ते-अतिशायिनः केशाः सन्ति आसाम् इति केशिकाः स्त्रियः तासाम् इयम् इति कैशिकी । भारती रूपत्वात् । आरेण प्रतोदकेन तुल्याः भट्टाः आरभटाः तेषाम् इयम् इति आरभटी । सत्त्वं प्रकाशः, तद् यत्रास्ति तत् मनः, तत्र भवः सात्त्वती । ब्रह्मणा चतुर्भ्यः वेदेभ्यः चतस्रः वृत्तयः गृहीता इत्येतदपि उल्लिखितं प्राप्यते -

**ऋग्वेदात् भारती क्षिप्ता यजुर्वेदाच्च सात्त्वती ।**
**कैशिकी सामवेदाच्च शेषा चाथर्वणादपि ॥**

वृत्तिचतुष्टयस्य परस्परं भिन्नस्वभावत्वेन तासां प्रयोगः भिन्न-भिन्नरसेषु भवति। तत्र शृङ्गारे कैशिकी, वीरे सात्त्वती, रौद्रे बीभत्से च आरभटी प्रयुज्यते। शब्दवृत्तित्वात् भारतीवृत्तिः सर्वेषु रसेषु व्याप्ता तिष्ठति।[22] अत्र चतुर्णां रसानामेव उल्लेखः अस्ति शिष्टानां रसानाम् एतेभ्यः उत्पन्नत्वात्-

शृङ्गाराद्धि भवेद् हास्यो रौद्राच्च करुणो रसः।
वीराच्चैवादभुतोत्पत्तिर्बीभत्साच्च भयानकः ॥

काव्ये वृत्तेः स्थानम् अतीव महत्त्वपूर्णम्, एतस्याः काव्याधारत्वात्। वृत्तेः उत्पत्तिः वेदेभ्यः मन्यते। वृत्तिव्यवहारे कुशली कविः निर्बाधं रसप्रवाहद्वारा काव्ये अनिर्वचनीयां शोभाम् उत्पादयितुं क्षमः भवति।

## सन्दर्भसूची


1. निरुक्तम् २/९
2. महाभाष्यम्, प्रथमाह्निकम्, वार्तिक सं १०
3. एकशेषप्रकरणम्, सिद्धान्तकौमुदी
4. नाटयशास्त्रम् ६/२५ चतस्रो वृत्तयो ह्येता यासु नाट्यं प्रतिष्ठितम्।
5. तथा १८/४ सर्वेषामेव काव्यानां मातृका वृत्तयः स्मृताः। आभ्यो विनिःसृतम् एतद्दशरूपं प्रयोगतः।
6. साहित्यदर्पणः ६/१२३ चतस्रो वृत्तयो ह्येताः सर्वनाट्यस्य मातृकाः।
7. ना० ल० र० पृ० १०५ गीतवादित्ररसभावाभिनयनृत्यजातीनां क्वापि विशेषवर्तनमिति वृत्तिः।
8. स.क. २/३४

   या विकासेऽर्थविक्षेपे संकोचे विस्तरे तथा।
   चेतसो वर्तयित्री स्यात्सा वृत्तिः षड्विधा स्मृता ॥
9. र.द. २/३४ वृत्तिर्वर्तनं रसविषयो व्यापारः काव्यस्य रसप्रवणत्वात्।
10. ध्व. ३/३३ व्यवहारो हि वृत्तिरुच्यते।
11. लोच0 ३/४ रसोचित एव चेष्टाविशेषो वृत्तिः।
12. ध्व.३/३३ वृत्तयो हि रसादितात्पर्येण सन्निवेशिता कमपि नाट्यस्य च्छायामावहन्ति।
13. शृ.ति. ३/५२ चतस्रो वृत्तयो ज्ञेया रसावस्थानसूचिकाः।
14. ना.द. ३/९ रसभावाभिनयगाः।
15. ना.शा. पुमर्थसाधको व्यापारः वृत्तिः।
16. दशरू० पुरुषार्थसाधको विचित्रो व्यापारो वृत्तिः।
17. अ.भा. १८/११० व्यापारः पुरुषार्थसाधको वृत्तिः।
18. अग्निपुराणम् त्रिवर्गसाधनं नाट्यम्।
19. ध्वन्या० तत्र रसानुगुण औचित्यवान् वाच्याश्रयो यो व्यावहारस्ता एताः कैशिक्याद्या वृत्तयः।
20. ध्वन्या० ३/१३
21. अ.भा. १८/११० काव्यस्य मातृका इति। नहि किञ्चित् व्यापारशून्यं वर्णनीयम् अस्ति।
22. दशरू. २/६२

   शृङ्गारे कैशिकी वीरे सात्त्वत्यारभटी पुनः।
   रसे रौद्रे च बीभत्से वृत्तिः सर्वत्र भारती ॥


❊

# भारतमञ्जर्यां गीतोपदेशः

डा० (श्रीमती) वीणा शर्मा

व्यासदासापरनामधेयेन काश्मीरकेण महाकविना क्षेमेन्द्रेण रामायणमञ्जर्यादीनि पञ्च महाकाव्यानि, औचित्यविचारचर्चादीनि त्रीणि काव्यशास्त्रविषयकाणि, दशाधिकानि चोपदेशपराणि व्यङ्ग्यकाव्यानि प्रणीतानि, यानि चाद्यत्वे समुपलभ्यन्ते। किञ्च तद्ग्रन्थेषु सूचितानि स्वरचितकाव्यादीन्यपि प्रायेणैतावतीमेव संख्यामाश्रयन्ते। एवं व्यापकरचनाकौशलायामं दर्शयन् महाकविरयं कश्मीरप्रदेशेऽनन्तकलशनामकयोर्नरेशयोः शासनकाले स्वरचनाचातुर्यं प्रकटितवानिति विद्वांसः कालमस्य 1000–1070 ई० मध्ये स्थापयन्ति। साहित्यशास्त्रेऽस्य गुरुरासीत्परममाहेश्वरः प्रत्यभिज्ञादर्शनव्याख्याकारोऽभिनवगुप्तः। रामायण–महाभारतयोरार्षकाव्ययोः कथानकमाश्रित्य क्षेमेन्द्रो यौवनकाल एव रामायणमञ्जरीं भारतमञ्जरीं चेति काव्यद्वयं विशालं प्रायेणानुष्टुप्छन्दसैवारचयत्। इह कथानकमात्रं प्राचीनमास्ते, अन्यथा सर्वमन्यत् कवेरस्य नवप्रणयनमेव वर्तते। अनेन खलु मूलग्रन्थस्य विषयानार्जवेनानुसरन् कविः स्वकाव्यक्षेत्रप्रवेशं सूचयति। भारतमञ्जर्यां भीष्मपर्वणि भगवद्गीतायाः काव्यात्मकं सारभूतं तत्त्वं क्षेमेन्द्रस्य दार्शनिकतां कवित्वं चैकीकृत्य विराजते इति कवेर्विशेषः।

मञ्जरीकाव्येषु महाकविरयं संक्षेपणस्य कवित्वमूलस्योत्कर्षं दर्शयतीति नाविदितं विपश्चिताम्। महाभारतस्य भीष्मपर्वान्तर्गता भगवद्गीता तस्य पर्वणः पञ्चविंशतितमादध्यायाद् द्विचत्वारिंशत्तममध्यायं यावत्सप्तशतश्लोकेषु (700) वर्तते किन्तु क्षेमेन्द्रेण भारतमञ्जरीकाव्ये तदेव ग्रन्थपरिमाणं स्वग्रन्थस्य भीष्मपर्वणः अष्टाविंशतितमात् श्लोकात् एकोनाशीत्यधिकशततमश्लोकं यावत् (श्लोक 28–179) परिमितं कृतमेकपञ्चशदधिकशतश्लोकेषु। तदिदं परिमाणं (151 श्लोकाः) स्वतो

मङ्गलिकमिति भगवद्गीतायाः संक्षेपणं काव्यसौन्दर्यप्रमुखं धर्मचर्यात्मकमिति कथनार्हम्। तत्र प्रत्यध्यायं सूचनं च यथामूलं निर्दिष्टं कविनेति विशेषोऽपि दृश्यते यथा-'श्रीमद्भगवद्गीतासु प्रथमोऽध्यायः' इति पुष्पिका षट्त्रिंशत्तमात्पद्यादनन्तरम्, एवमेव यथायथं पुष्पिकाः सर्वेष्वध्यायेषु निर्दिष्टाः। अध्यायेषु न्यूनतमाश्चत्वारोऽधिकतमाश्चाष्टादश श्लोकाः सन्ति।

अर्जुनविषादप्रसङ्गे कविरेष श्लोकद्वयेनैव गाण्डीवधारिणो मानसं द्वन्द्वं प्रस्तौति -

**अहो बत विमूढानां राज्यलेशे सुखाय नः ।**
**कृष्ण बन्धुवधेऽप्यस्मिन्ससंरम्भोऽयमुद्यमः ॥**
**अवतीर्य सदाचारस्तुतिक्रम्यकुलस्थितिम् ।**
**कथं गुरुवधप्राप्यां भजेदस्मद्विधः श्रियम् ॥** (भा.मं. 6.34-5)

भगवद्गीतायाः सांख्ययोगाख्यस्य द्वितीयाध्यायस्य द्वासप्ततिश्लोकानां सारः सप्तदशपद्येषु दत्तः क्षेमेन्द्रेण। तत्रापि नव्यभव्यकल्पना हृदयमावर्जयति। यथा जीर्णवस्त्रपरिवर्तनस्योपमानं प्रसिद्धमपि भङ्गीवैशिष्ट्येन नवपर्णतां वृक्षस्येति प्रस्तौति -

**अजरस्य पुराणस्य देहिनोऽस्याविनाशिनः ।**
**जीर्णपर्णपरावृत्तितुल्येयं देहकल्पना ॥** (भा.म. 6.42)

क्वचित्पद्यस्य पद्यान्तरमपि प्रवर्तितं दृश्यते भावश्चेन्मनोरमः, यथा गीतायाः पद्यमेतत् -

**यावानर्थ उदपाने सर्वतः संप्लुतोदके ।**
**तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥** (गी. 2.46)

क्षेमेन्द्रकृतं रूपान्तरं वर्तते -

**सर्ववेदेषु विदुषामेतदेव प्रयोजनम् ।**
**जलाशयेषु पूर्णेषु यथा सलिलहारिणाम् ॥** (भा.म. 6.46)

ब्रह्मप्राप्तिनिबन्धनां परमां स्थितिं कविरेष काव्यात्मकं चित्रयति -

**निद्रालुर्भूतकालेषु प्रबुद्धस्तिमिरेषु यः ।**
**स महाब्धिरिवाक्षोभ्यः स्थितिं ब्राह्मीं प्रपद्यते ॥** (भा.म. 6.53)



यद्यपि 'समुद्रमापः प्रविशन्ति यद्वत्' (गी. 2.70) इत्युपमानं गीतायां वर्तते तथापि समुद्रस्य अक्षोभ्यता कवेरस्याभिनवा व्याख्यैवास्ति। या निशा सर्वभूतानामित्यपि भङ्गीविशेषेण सौन्दर्यमादधाति क्षेमेन्द्रस्य पद्ये।

कर्मयोगाख्यस्य तृतीयाध्यायस्यावसाने कामरूपस्य शत्रोः ज्ञानावरणकरूपं गीतायां प्रकाशितं भगवता श्रीकृष्णेन। कामः कथं ज्ञानमाच्छादयतीत्यत्र गीतायां त्रीण्युपमानानि दत्तानि -

**धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।**
**यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥** (गी. 3.38)

अपरत्र क्षेमेन्द्रः कामस्य प्रभावं साहसिकत्वं च दर्शयन् शैलीचारुत्वं प्रकटयति -

**लोकसंहारशीलेन कामेन क्रोधबन्धुना ।**
**अहंकारेण बलिना घोरेणानेन वैरिणा ॥**
**शैवालेनैव सलिलं रजसेवामलं नभः ।**
**आवृतो मलिनेनात्मा मेघेनैवोदितो रविः ॥** (भा.म. 6.68-9)

इत्थमपराणि त्रीण्युपमानानि सन्दर्भेऽस्मिन्ददाति कविः, 'दुःसहं शत्रुं कामरूपं विनाशय' इत्युपदेशं च दिशति। एवमेव यथायथं गीतायाः मौलिकान्भावान् रक्षन्नपि क्षेमेन्द्रः क्षणेन काव्यपक्षपातित्वेन भावसारं सुषमासमन्वितं प्रस्तौति। तेनैवानन्दवर्धनस्योक्तिरियं संगता भवति -

**दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।**
**सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ॥** (ध्वन्यालोकः 4.4)

कृष्णोक्तिषु सारल्यं भाषाप्रवाहश्च हृदयावर्जकौ स्तः, क्षेमेन्द्रकृते रूपान्तरे क्वचित्समासत्वं क्वचिद् व्यासत्वं स्थाने च भङ्गीविशेषोपयोगः शैलीसौम्यत्वं चेति विशेषा गीतां प्रति सर्वेषां रुचिमुत्पादयन्ति। न कुत्रापि प्रभुसम्मितः सुहृत्सम्मितो वोपदेशो दृश्यते, किन्तर्हि? कान्तासम्मित एवोपदेशः। औचित्यप्रस्थानाभिनिवेशी क्षेमेन्द्रः एकं भावं सकृदेव निरूपयति, न तदावर्तने रुचिमान् प्रतीयते इत्यप्यस्य गीतासारस्य विशेषः।

यत्र गीताया दशमाध्याये स्वविभूतिप्रकाशने तत्तत्पदार्थेष्वात्मानं प्रकटयन् निरूपयति 'वेदानां सामवेदोऽस्मि देवानामस्मि वासवः

(गी. 10.20)' इत्यादि, तत्र विस्तरं हित्वा कविरेष समासतः कथयति -

चराचरेऽस्मिन्प्रवरं यद्यत्पश्यसि भूतिमत् ।
तदहं सर्वभूतात्मा न हि किंचिन्मया विना ॥
अहं विष्णुरहं सूर्यश्चन्द्रोऽहं मघवानहम् ।
शंकरोऽहं धनेशश्च वह्निः सुरगुरुस्तथा ॥ (भा.म. 6/123-4)

एवमेव विश्वरूपदर्शनप्रकरणे सामासिकत्वं शोभते यथा -

तस्यानन्तशिरोनेत्रसहस्रभुजशालिनः ।
देहे जगन्निवासस्य लीनं विश्वमदृश्यत ॥ (127)
पश्याम्युदग्र-गीर्वाणग्राम-व्याप्तोरुविग्रहम् ।
त्वां येन पूरितं सर्वमनवच्छिन्नवर्ष्मणा ॥ (129)

गीतायाः सप्तदशाध्याये भगवान् त्रैगुण्यानुसारेण श्रद्धामाहारं यज्ञं तपो दानं चेति विविधान्विषयान् सात्त्विक-राजस-तामसरूपेण वर्णयँल्लोकस्य व्यवहारान् प्रकाशयति। क्षेमेन्द्रस्तु त्यागमात्रमुक्तत्रैगुण्यानुबन्धि दर्शयन्सर्वानुपसंहरति -

सर्वकर्मफलत्यागस्त्याग इत्यभिधीयते ।
सत्कर्म न परित्याज्यं त्याज्यं तु विधिगर्हितम् ॥
नित्यकर्मपरित्यागो मोहात्तामस उच्यते ।
क्लेशदुःखभयात्त्यागो राजसो निष्फलः स्मृतः ।
कुर्वतामप्यसक्तानां त्यागः सत्त्वोचितो मतः ॥ (6.173-4)

अन्ततः कृष्णेन मोहविनाशविषयके प्रश्ने पृष्टे सत्यर्जुनस्य श्लोकार्धेनोत्तरं हृदयावर्जकं वर्तते - भगवन्वीतमोहोऽहं करिष्ये तव शासनम् (6.179)।

गीतासारेणानेनेदं स्फुटं भवति यन्महाकविः क्षेमेन्द्रो यद्यपि काव्यक्षेत्रं प्रविविक्षुर्महाभारतस्य साररूपां मञ्जरीमरीरचत्, तथापि गीतासारेऽस्मिन् सम्यगधीतविषयो महत्त्वपूर्णानेव भावान्संकलय्य काव्यसौन्दर्येण दार्शनिकान्यपि पद्यानि समन्वेति। संस्कृतभाषायाः सारल्यं रक्षन्नपि क्षेमेन्द्रः काव्योचितं परिष्कारमानयतीति शम् ।

❋



# 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते । वर्षारम्भः चैत्रात् (मार्च तः) मन्यते ।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते । मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते । तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्कः उपलब्धौ सत्यां प्रेषयिष्यते ।
3. वार्षिकं शुल्कं त्रिंशत् (३०) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चदश रूप्यकाणि वर्तते । शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम् ।

   (क) धनादेश (M. O.) द्वारा शुल्कप्रेषणं **डॉ० गोपबन्धु मिश्रः, रीडर, संस्कृतविभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी-221005** इति नाम्ना कारणीयम् ।

   (ख) बैंक ड्राफ्ट **'संस्कृतप्रसारपरिषद्'** इति नाम्ना 'आरा' (विहारः) नगरे व्यवहरणीयं कृत्वा प्रेषणीयम् ।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिकनिबन्धाः प्रकाशनाय गृह्यन्ते । अस्वीकृता लेखा निर्धारित 'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः ।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते ।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः । रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम् ।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम् ।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते ।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः ।
10. 'आरण्यक'सम्बद्धः सर्वविधपत्रव्यवहारः **डा० गोपबन्धु मिश्रः, रीडर, संस्कृतविभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी-221005** इति सङ्केतेन विधेयम् ।

❖